shrImadbhAgavataM - ShaShThaskandhaH

શ્રીમદ્ભાગવતં - ષષ્ઠસ્કન્ધઃ

Document Information

Text title : shrImadbhAgavatam - 06 - ShaShThaskandhaH

File name : bhagpur-06.itx

Category : purana, shrimadbhagavatam, vyAsa, krishna

Location : doc_purana

Proofread by : PSA Easwaran

Latest update : July 4, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2025

sanskritdocuments.org

shrImadbhAgavataM - ShaShThaskandhaH

શ્રીમદ્ભાગવતં - ષષ્ઠસ્કન્ધઃ

શ્રીમદ્ભાગવતં - ષષ્ઠસ્કન્ધઃ

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ષષ્ઠસ્કન્ધઃ ॥

॥ પ્રથમોઽધ્યાયઃ - ૧ ॥

રાજોવાચ
નિવૃત્તિમાર્ગઃ કથિત આદૌ ભગવતા યથા ।
ક્રમયોગોપલબ્ધેન બ્રહ્મણા યદસંસૃતિઃ ॥ ૧॥

પ્રવૃત્તિલક્ષણશ્ચૈવ ત્રૈગુણ્યવિષયો મુને ।
યોઽસાવલીનપ્રકૃતેર્ગુણસર્ગઃ પુનઃ પુનઃ ॥ ૨॥

અધર્મલક્ષણા નાના નરકાશ્ચાનુવર્ણિતાઃ ।
મન્વન્તરશ્ચ વ્યાખ્યાત આદ્યઃ સ્વાયમ્ભુવો યતઃ ॥ ૩॥

પ્રિયવ્રતોત્તાનપદોર્વંશસ્તચ્ચરિતાનિ ચ ।
દ્વીપવર્ષસમુદ્રાદ્રિનદ્યુદ્યાનવનસ્પતીન્ ॥ ૪॥

ધરામણ્ડલસંસ્થાનં ભાગલક્ષણમાનતઃ ।
જ્યોતિષાં વિવરાણાં ચ યથેદમસૃજદ્વિભુઃ ॥ ૫॥

અધુનેહ મહાભાગ યથૈવ નરકાન્નરઃ ।
નાનોગ્રયાતનાન્ નેયાત્તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૬॥

શ્રીશુક ઉવાચ
ન ચેદિહૈવાપચિતિં યથાંહસઃ
કૃતસ્ય કુર્યાન્મન ઉક્તપાણિભિઃ ।
ધ્રુવં સ વૈ પ્રેત્ય નરકાનુપૈતિ
યે કીર્તિતા મે ભવતસ્તિગ્મયાતનાઃ ॥ ૭॥

તસ્માત્પુરૈવાશ્વિહ પાપનિષ્કૃતૌ
યતેત મૃત્યોરવિપદ્યતાત્મના ।
દોષસ્ય દૃષ્ટ્વા ગુરુલાઘવં યથા
ભિષક્ચિકિત્સેત રુજાં નિદાનવિત્ ॥ ૮॥

રાજોવાચ
દૃષ્ટશ્રુતાભ્યાં યત્પાપં જાનન્નપ્યાત્મનોઽહિતમ્ ।
કરોતિ ભૂયો વિવશઃ પ્રાયશ્ચિત્તમથો કથમ્ ॥ ૯॥

ક્વચિન્નિવર્તતેઽભદ્રાત્ક્વચિચ્ચરતિ તત્પુનઃ ।
પ્રાયશ્ચિત્તમથોઽપાર્થં મન્યે કુઞ્જરશૌચવત્ ॥ ૧૦॥

શ્રીશુક ઉવાચ
કર્મણા કર્મનિર્હારો ન હ્યાત્યન્તિક ઇષ્યતે ।
અવિદ્વદધિકારિત્વાત્પ્રાયશ્ચિત્તં વિમર્શનમ્ ॥ ૧૧॥

નાશ્નતઃ પથ્યમેવાન્નં વ્યાધયોઽભિભવન્તિ હિ ।
એવં નિયમકૃદ્રાજન્ શનૈઃ ક્ષેમાય કલ્પતે ॥ ૧૨॥

તપસા બ્રહ્મચર્યેણ શમેન ચ દમેન ચ ।
ત્યાગેન સત્યશૌચાભ્યાં યમેન નિયમેન ચ ॥ ૧૩॥

દેહવાગ્બુદ્ધિજં ધીરા ધર્મજ્ઞાઃ શ્રદ્ધયાન્વિતાઃ ।
ક્ષિપન્ત્યઘં મહદપિ વેણુગુલ્મમિવાનલઃ ॥ ૧૪॥

કેચિત્કેવલયા ભક્ત્યા વાસુદેવપરાયણાઃ ।
અઘં ધુન્વન્તિ કાર્ત્સ્ન્યેન નીહારમિવ ભાસ્કરઃ ॥ ૧૫॥

ન તથા હ્યઘવાન્ રાજન્ પૂયેત તપ આદિભિઃ ।
યથા કૃષ્ણાર્પિતપ્રાણસ્તત્પૂરુષનિષેવયા ॥ ૧૬॥

સધ્રીચીનો હ્યયં લોકે પન્થાઃ ક્ષેમોઽકુતોભયઃ ।
સુશીલાઃ સાધવો યત્ર નારાયણપરાયણાઃ ॥ ૧૭॥

પ્રાયશ્ચિત્તાનિ ચીર્ણાનિ નારાયણપરાઙ્મુખમ્ ।
ન નિષ્પુનન્તિ રાજેન્દ્ર સુરાકુમ્ભમિવાપગાઃ ॥ ૧૮॥

સકૃન્મનઃ કૃષ્ણપદારવિન્દયો-
ર્નિવેશિતં તદ્ગુણરાગિ યૈરિહ ।

ન તે યમં પાશભૃતશ્ચ તદ્ભટાન્
સ્વપ્નેઽપિ પશ્યન્તિ હિ ચીર્ણનિષ્કૃતાઃ ॥ ૧૯॥

અત્ર ચોદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
દૂતાનાં વિષ્ણુયમયોઃ સંવાદસ્તં નિબોધ મે ॥ ૨૦॥

કાન્યકુબ્જે દ્વિજઃ કશ્ચિદ્દાસીપતિરજામિલઃ ।
નામ્ના નષ્ટસદાચારો દાસ્યાઃ સંસર્ગદૂષિતઃ ॥ ૨૧॥

બન્ધ્યક્ષકૈતવૈશ્ચૌર્યૈર્ગર્હિતાં વૃત્તિમાસ્થિતઃ ।
બિભ્રત્કુટુમ્બમશુચિર્યાતયામાસ દેહિનઃ ॥ ૨૨॥

એવં નિવસતસ્તસ્ય લાલયાનસ્ય તત્સુતાન્ ।
કાલોઽત્યગાન્મહાન્ રાજન્નષ્ટાશીત્યાયુષઃ સમાઃ ॥ ૨૩॥

તસ્ય પ્રવયસઃ પુત્રા દશ તેષાં તુ યોઽવમઃ ।
બાલો નારાયણો નામ્ના પિત્રોશ્ચ દયિતો ભૃશમ્ ॥ ૨૪॥

સ બદ્ધહૃદયસ્તસ્મિન્નર્ભકે કલભાષિણિ ।
નિરીક્ષમાણસ્તલ્લીલાં મુમુદે જરઠો ભૃશમ્ ॥ ૨૫॥

ભુઞ્જાનઃ પ્રપિબન્ ખાદન્ બાલકસ્નેહયન્ત્રિતઃ ।
ભોજયન્ પાયયન્ મૂઢો ન વેદાગતમન્તકમ્ ॥ ૨૬॥

સ એવં વર્તમાનોઽજ્ઞો મૃત્યુકાલ ઉપસ્થિતે ।
મતિં ચકાર તનયે બાલે નારાયણાહ્વયે ॥ ૨૭॥

સ પાશહસ્તાંસ્ત્રીન્ દૃષ્ટ્વા પુરુષાન્ ભૃશદારુણાન્ ।
વક્રતુણ્ડાનૂર્ધ્વરોમ્ણ આત્માનં નેતુમાગતાન્ ॥ ૨૮॥

દૂરે ક્રીડનકાસક્તં પુત્રં નારાયણાહ્વયમ્ ।
પ્લાવિતેન સ્વરેણોચ્ચૈરાજુહાવાકુલેન્દ્રિયઃ ॥ ૨૯॥

નિશમ્ય મ્રિયમાણસ્ય બ્રુવતો હરિકીર્તનમ્ ।
ભર્તુર્નામ મહારાજ પાર્ષદાઃ સહસાપતન્ ॥ ૩૦॥

વિકર્ષતોઽન્તર્હૃદયાદ્દાસીપતિમજામિલમ્ ।
યમપ્રેષ્યાન્ વિષ્ણુદૂતા વારયામાસુરોજસા ॥ ૩૧॥

ઊચુર્નિષેધિતાસ્તાંસ્તે વૈવસ્વતપુરઃસરાઃ ।
કે યૂયં પ્રતિષેદ્ધારો ધર્મરાજસ્ય શાસનમ્ ॥ ૩૨॥

કસ્ય વા કુત આયાતાઃ કસ્માદસ્ય નિષેધથ ।
કિં દેવા ઉપદેવા યા યૂયં કિં સિદ્ધસત્તમાઃ ॥ ૩૩॥

સર્વે પદ્મપલાશાક્ષાઃ પીતકૌશેયવાસસઃ ।
કિરીટિનઃ કુણ્ડલિનો લસત્પુષ્કરમાલિનઃ ॥ ૩૪॥

સર્વે ચ નૂત્નવયસઃ સર્વે ચારુચતુર્ભુજાઃ ।
ધનુર્નિષઙ્ગાસિગદાશઙ્ખચક્રામ્બુજશ્રિયઃ ॥ ૩૫॥

દિશો વિતિમિરાલોકાઃ કુર્વન્તઃ સ્વેન રોચિષા ।
કિમર્થં ધર્મપાલસ્ય કિઙ્કરાન્નો નિષેધથ ॥ ૩૬॥

શ્રીશુક ઉવાચ
ઇત્યુક્તે યમદૂતૈસ્તૈર્વાસુદેવોક્તકારિણઃ ।
તાન્ પ્રત્યૂચુઃ પ્રહસ્યેદં મેઘનિર્હ્રાદયા ગિરા ॥ ૩૭॥

વિષ્ણુદૂતા ઊચુઃ
યૂયં વૈ ધર્મરાજસ્ય યદિ નિર્દેશકારિણઃ ।
બ્રૂત ધર્મસ્ય નસ્તત્ત્વં યચ્ચ ધર્મસ્ય લક્ષણમ્ ॥ ૩૮॥

કથં સ્વિદ્ધ્રિયતે દણ્ડઃ કિં વાસ્ય સ્થાનમીપ્સિતમ્ ।
દણ્ડ્યાઃ કિં કારિણઃ સર્વે આહોસ્વિત્કતિચિન્નૃણામ્ ॥ ૩૯॥

યમદૂતા ઊચુઃ
વેદપ્રણિહિતો ધર્મો હ્યધર્મસ્તદ્વિપર્યયઃ ।
વેદો નારાયણઃ સાક્ષાત્સ્વયમ્ભૂરિતિ શુશ્રુમ ॥ ૪૦॥

યેન સ્વધામ્ન્યમી ભાવા રજઃસત્ત્વતમોમયાઃ ।
ગુણનામક્રિયારૂપૈર્વિભાવ્યન્તે યથાતથમ્ ॥ ૪૧॥

સૂર્યોઽગ્નિઃ ખં મરુદ્ગાવઃ સોમઃ સન્ધ્યાહની દિશઃ ।
કં કુઃ સ્વયં ધર્મ ઇતિ હ્યેતે દૈહ્યસ્ય સાક્ષિણઃ ॥ ૪૨॥

એતૈરધર્મો વિજ્ઞાતઃ સ્થાનં દણ્ડસ્ય યુજ્યતે ।
સર્વે કર્માનુરોધેન દણ્ડમર્હન્તિ કારિણઃ ॥ ૪૩॥

સમ્ભવન્તિ હિ ભદ્રાણિ વિપરીતાનિ ચાનઘાઃ ।
કારિણાં ગુણસઙ્ગોઽસ્તિ દેહવાન્ ન હ્યકર્મકૃત્ ॥ ૪૪॥

યેન યાવાન્ યથાધર્મો ધર્મો વેહ સમીહિતઃ ।
સ એવ તત્ફલં ભુઙ્ક્તે તથા તાવદમુત્ર વૈ ॥ ૪૫॥

યથેહ દેવપ્રવરાસ્ત્રૈવિધ્યમુપલભ્યતે ।
ભૂતેષુ ગુણવૈચિત્ર્યાત્તથાન્યત્રાનુમીયતે ॥ ૪૬॥

વર્તમાનોઽન્યયોઃ કાલો ગુણાભિજ્ઞાપકો યથા ।
એવં જન્માન્યયોરેતદ્ધર્માધર્મનિદર્શનમ્ ॥ ૪૭॥

મનસૈવ પુરે દેવઃ પૂર્વરૂપં વિપશ્યતિ ।
અનુમીમાંસતેઽપૂર્વં મનસા ભગવાનજઃ ॥ ૪૮॥

યથાજ્ઞસ્તમસા યુક્ત ઉપાસ્તે વ્યક્તમેવ હિ ।
ન વેદ પૂર્વમપરં નષ્ટજન્મસ્મૃતિસ્તથા ॥ ૪૯॥

પઞ્ચભિઃ કુરુતે સ્વાર્થાન્ પઞ્ચ વેદાથ પઞ્ચભિઃ ।
એકસ્તુ ષોડશેન ત્રીન્ સ્વયં સપ્તદશોઽશ્નુતે ॥ ૫૦॥

તદેતત્ષોડશકલં લિઙ્ગં શક્તિત્રયં મહત્ ।
ધત્તેઽનુ સંસૃતિં પુંસિ હર્ષશોકભયાર્તિદામ્ ॥ ૫૧॥

દેહ્યજ્ઞોઽજિતષડ્વર્ગો નેચ્છન્ કર્માણિ કાર્યતે ।
કોશકાર ઇવાત્માનં કર્મણાઽઽચ્છાદ્ય મુહ્યતિ ॥ ૫૨॥

ન હિ કશ્ચિત્ક્ષણમપિ જાતુ તિષ્ઠત્યકર્મકૃત્ ।
કાર્યતે હ્યવશઃ કર્મ ગુણૈઃ સ્વાભાવિકૈર્બલાત્ ॥ ૫૩॥

લબ્ધ્વા નિમિત્તમવ્યક્તં વ્યક્તાવ્યક્તં ભવત્યુત ।
યથાયોનિ યથાબીજં સ્વભાવેન બલીયસા ॥ ૫૪॥

એષ પ્રકૃતિસઙ્ગેન પુરુષસ્ય વિપર્યયઃ ।
આસીત્સ એવ ન ચિરાદીશસઙ્ગાદ્વિલીયતે ॥ ૫૫॥

અયં હિ શ્રુતસમ્પન્નઃ શીલવૃત્તગુણાલયઃ ।
ધૃતવ્રતો મૃદુર્દાન્તઃ સત્યવાન્મન્ત્રવિચ્છુચિઃ ॥ ૫૬॥

ગુર્વગ્ન્યતિથિવૃદ્ધાનાં શુશ્રૂષુરનહઙ્કૃતઃ ।
સર્વભૂતસુહૃત્સાધુર્મિતવાગનસૂયકઃ ॥ ૫૭॥

એકદાસૌ વનં યાતઃ પિતૃસન્દેશકૃદ્દ્વિજઃ ।
આદાય તત આવૃત્તઃ ફલપુષ્પસમિત્કુશાન્ ॥ ૫૮॥

દદર્શ કામિનં કઞ્ચિચ્છૂદ્રં સહ ભુજિષ્યયા ।
પીત્વા ચ મધુ મૈરેયં મદાઘૂર્ણિતનેત્રયા ॥ ૫૯॥

મત્તયા વિશ્લથન્નીવ્યા વ્યપેતં નિરપત્રપમ્ ।
ક્રીડન્તમનુગાયન્તં હસન્તમનયાન્તિકે ॥ ૬૦॥

દૃષ્ટ્વા તાં કામલિપ્તેન બાહુના પરિરમ્ભિતામ્ ।
જગામ હૃચ્છયવશં સહસૈવ વિમોહિતઃ ॥ ૬૧॥

સ્તમ્ભયન્નાત્મનાઽઽત્માનં યાવત્સત્ત્વં યથાશ્રુતમ્ ।
ન શશાક સમાધાતું મનો મદનવેપિતમ્ ॥ ૬૨॥

તન્નિમિત્તસ્મરવ્યાજગ્રહગ્રસ્તો વિચેતનઃ ।
તામેવ મનસા ધ્યાયન્ સ્વધર્માદ્વિરરામ હ ॥ ૬૩॥

તામેવ તોષયામાસ પિત્ર્યેણાર્થેન યાવતા ।
ગ્રામ્યૈર્મનોરમૈઃ કામૈઃ પ્રસીદેત યથા તથા ॥ ૬૪॥

વિપ્રાં સ્વભાર્યામપ્રૌઢાં કુલે મહતિ લમ્ભિતામ્ ।
વિસસર્જાચિરાત્પાપઃ સ્વૈરિણ્યાપાઙ્ગવિદ્ધધીઃ ॥ ૬૫॥

યતસ્તતશ્ચોપનિન્યે ન્યાયતોઽન્યાયતો ધનમ્ ।
બભારાસ્યાઃ કુટુમ્બિન્યાઃ કુટુમ્બં મન્દધીરયમ્ ॥ ૬૬॥

યદસૌ શાસ્ત્રમુલ્લઙ્ઘ્ય સ્વૈરચાર્યર્વિગર્હિતઃ ।
અવર્તત ચિરં કાલમઘાયુરશુચિર્મલાત્ ॥ ૬૭॥

તત એનં દણ્ડપાણેઃ સકાશં કૃતકિલ્બિષમ્ ।
નેષ્યામોઽકૃતનિર્વેશં યત્ર દણ્ડેન શુદ્ધ્યતિ ॥ ૬૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે અજામિલોપાખ્યાને પ્રથમોઽધ્યાયઃ ॥ ૧॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દ્વિતીયોઽધ્યાયઃ - ૨ ॥

શ્રીશુક ઉવાચ
એવં તે ભગવદ્દૂતા યમદૂતાભિભાષિતમ્ ।
ઉપધાર્યાથ તાન્ રાજન્ પ્રત્યાહુર્નયકોવિદાઃ ॥ ૧॥

વિષ્ણુદૂતા ઊચુઃ
અહો કષ્ટં ધર્મદૃશામધર્મઃ સ્પૃશતે સભામ્ ।
યત્રાદણ્ડ્યેષ્વપાપેષુ દણ્ડો યૈર્ધ્રિયતે વૃથા ॥ ૨॥

પ્રજાનાં પિતરો યે ચ શાસ્તારઃ સાધવઃ સમાઃ ।
યદિ સ્યાત્તેષુ વૈષમ્યં કં યાન્તિ શરણં પ્રજાઃ ॥ ૩॥

યદ્યદાચરતિ શ્રેયાનિતરસ્તત્તદીહતે ।
સ યત્પ્રમાણં કુરુતે લોકસ્તદનુવર્તતે ॥ ૪॥

યસ્યાઙ્કે શિર આધાય લોકઃ સ્વપિતિ નિર્વૃતઃ ।
સ્વયં ધર્મમધર્મં વા ન હિ વેદ યથા પશુઃ ॥ ૫॥

સ કથં ન્યર્પિતાત્માનં કૃતમૈત્રમચેતનમ્ ।
વિસ્રમ્ભણીયો ભૂતાનાં સઘૃણો દ્રોગ્ધુમર્હતિ ॥ ૬॥

અયં હિ કૃતનિર્વેશો જન્મકોટ્યંહસામપિ ।
યદ્વ્યાજહાર વિવશો નામ સ્વસ્ત્યયનં હરેઃ ॥ ૭॥

એતેનૈવ હ્યઘોનોઽસ્ય કૃતં સ્યાદઘનિષ્કૃતમ્ ।
યદા નારાયણાયેતિ જગાદ ચતુરક્ષરમ્ ॥ ૮॥

સ્તેનઃ સુરાપો મિત્રધ્રુગ્ બ્રહ્મહા ગુરુતલ્પગઃ ।
સ્ત્રીરાજપિતૃગોહન્તા યે ચ પાતકિનોઽપરે ॥ ૯॥

સર્વેષામપ્યઘવતામિદમેવ સુનિષ્કૃતમ્ ।
નામવ્યાહરણં વિષ્ણોર્યતસ્તદ્વિષયા મતિઃ ॥ ૧૦॥

ન નિષ્કૃતૈરુદિતૈર્બ્રહ્મવાદિભિ-
સ્તથા વિશુદ્ધ્યત્યઘવાન્ વ્રતાદિભિઃ ।
યથા હરેર્નામપદૈરુદાહૃતૈ-
સ્તદુત્તમશ્લોકગુણોપલમ્ભકમ્ ॥ ૧૧॥

નૈકાન્તિકં તદ્ધિ કૃતેઽપિ નિષ્કૃતે

મનઃ પુનર્ધાવતિ ચેદસત્પથે ।
તત્કર્મનિર્હારમભીપ્સતાં હરે-
ર્ગુણાનુવાદઃ ખલુ સત્ત્વભાવનઃ ॥ ૧૨॥

અથૈનં માપનયત કૃતાશેષાઘનિષ્કૃતમ્ ।
યદસૌ ભગવન્નામ મ્રિયમાણઃ સમગ્રહીત્ ॥ ૧૩॥

સાઙ્કેત્યં પારિહાસ્યં વા સ્તોભં હેલનમેવ વા ।
વૈકુણ્ઠનામગ્રહણમશેષાઘહરં વિદુઃ ॥ ૧૪॥

પતિતઃ સ્ખલિતો ભગ્નઃ સન્દષ્ટસ્તપ્ત આહતઃ ।
હરિરિત્યવશેનાહ પુમાન્ નાર્હતિ યાતનામ્ ॥ ૧૫॥

ગુરૂણાં ચ લઘૂનાં ચ ગુરૂણિ ચ લઘૂનિ ચ ।
પ્રાયશ્ચિત્તાનિ પાપાનાં જ્ઞાત્વોક્તાનિ મહર્ષિભિઃ ॥ ૧૬॥

તૈસ્તાન્યઘાનિ પૂયન્તે તપોદાનજપાદિભિઃ ।
નાધર્મજં તદ્ધૃદયં તદપીશાઙ્ઘ્રિસેવયા ॥ ૧૭॥

અજ્ઞાનાદથવા જ્ઞાનાદુત્તમશ્લોકનામ યત્ ।
સઙ્કીર્તિતમઘં પુંસો દહેદેધો યથાનલઃ ॥ ૧૮॥

યથાગદં વીર્યતમમુપયુક્તં યદૃચ્છયા ।
અજાનતોઽપ્યાત્મગુણં કુર્યાન્મન્ત્રોઽપ્યુદાહૃતઃ ॥ ૧૯॥

શ્રીશુક ઉવાચ
ત એવં સુવિનિર્ણીય ધર્મં ભાગવતં નૃપ ।
તં યામ્યપાશાન્નિર્મુચ્ય વિપ્રં મૃત્યોરમૂમુચન્ ॥ ૨૦॥

ઇતિ પ્રત્યુદિતા યામ્યા દૂતા યાત્વા યમાન્તિકે ।
યમરાજ્ઞે યથા સર્વમાચચક્ષુરરિન્દમ ॥ ૨૧॥

દ્વિજઃ પાશાદ્વિનિર્મુક્તો ગતભીઃ પ્રકૃતિં ગતઃ ।
વવન્દે શિરસા વિષ્ણોઃ કિઙ્કરાન્ દર્શનોત્સવઃ ॥ ૨૨॥

તં વિવક્ષુમભિપ્રેત્ય મહાપુરુષકિઙ્કરાઃ ।
સહસા પશ્યતસ્તસ્ય તત્રાન્તર્દધિરેઽનઘ ॥ ૨૩॥

અજામિલોઽપ્યથાકર્ણ્ય દૂતાનાં યમકૃષ્ણયોઃ ।
ધર્મં ભાગવતં શુદ્ધં ત્રૈવિદ્યં ચ ગુણાશ્રયમ્ ॥ ૨૪॥

ભક્તિમાન્ ભગવત્યાશુ માહાત્મ્યશ્રવણાદ્ધરેઃ ।
અનુતાપો મહાનાસીત્સ્મરતોઽશુભમાત્મનઃ ॥ ૨૫॥

અહો મે પરમં કષ્ટમભૂદવિજિતાત્મનઃ ।
યેન વિપ્લાવિતં બ્રહ્મ વૃષલ્યાં જાયતાઽઽત્મના ॥ ૨૬॥

ધિઙ્ માં વિગર્હિતં સદ્ભિર્દુષ્કૃતં કુલકજ્જલમ્ ।
હિત્વા બાલાં સતીં યોઽહં સુરાપામસતીમગામ્ ॥ ૨૭॥

વૃદ્ધાવનાથૌ પિતરૌ નાન્યબન્ધૂ તપસ્વિનૌ ।
અહો મયાધુના ત્યક્તાવકૃતજ્ઞેન નીચવત્ ॥ ૨૮॥

સોઽહં વ્યક્તં પતિષ્યામિ નરકે ભૃશદારુણે ।
ધર્મઘ્નાઃ કામિનો યત્ર વિન્દન્તિ યમયાતનાઃ ॥ ૨૯॥

કિમિદં સ્વપ્ન આહોસ્વિત્સાક્ષાદ્દૃષ્ટમિહાદ્ભુતમ્ ।
ક્વ યાતા અદ્ય તે યે માં વ્યકર્ષન્ પાશપાણયઃ ॥ ૩૦॥

અથ તે ક્વ ગતાઃ સિદ્ધાશ્ચત્વારશ્ચારુદર્શનાઃ ।
વ્યમોચયન્ નીયમાનં બદ્ધ્વા પાશૈરધો ભુવઃ ॥ ૩૧॥

અથાપિ મે દુર્ભગસ્ય વિબુધોત્તમદર્શને ।
ભવિતવ્યં મઙ્ગલેન યેનાત્મા મે પ્રસીદતિ ॥ ૩૨॥

અન્યથા મ્રિયમાણસ્ય નાશુચેર્વૃષલીપતેઃ ।
વૈકુણ્ઠનામગ્રહણં જિહ્વા વક્તુમિહાર્હતિ ॥ ૩૩॥

ક્વ ચાહં કિતવઃ પાપો બ્રહ્મઘ્નો નિરપત્રપઃ ।
ક્વ ચ નારાયણેત્યેતદ્ભગવન્નામ મઙ્ગલમ્ ॥ ૩૪॥

સોઽહં તથા યતિષ્યામિ યતચિત્તેન્દ્રિયાનિલઃ ।
યથા ન ભૂય આત્માનમન્ધે તમસિ મજ્જયે ॥ ૩૫॥

વિમુચ્ય તમિમં બન્ધમવિદ્યાકામકર્મજમ્ ।
સર્વભૂતસુહૃચ્છાન્તો મૈત્રઃ કરુણ આત્મવાન્ ॥ ૩૬॥

મોચયે ગ્રસ્તમાત્માનં યોષિન્મય્યાઽઽત્મમાયયા ।
વિક્રીડિતો યયૈવાહં ક્રીડામૃગ ઇવાધમઃ ॥ ૩૭॥

મમાહમિતિ દેહાદૌ હિત્વા મિથ્યાર્થધીર્મતિમ્ ।
ધાસ્યે મનો ભગવતિ શુદ્ધં તત્કીર્તનાદિભિઃ ॥ ૩૮॥

શ્રીશુક ઉવાચ

ઇતિ જાતસુનિર્વેદઃ ક્ષણસઙ્ગેન સાધુષુ ।
ગઙ્ગાદ્વારમુપેયાય મુક્તસર્વાનુબન્ધનઃ ॥ ૩૯॥

સ તસ્મિન્ દેવસદન આસીનો યોગમાશ્રિતઃ ।
પ્રત્યાહૃતેન્દ્રિયગ્રામો યુયોજ મન આત્મનિ ॥ ૪૦॥

તતો ગુણેભ્ય આત્માનં વિયુજ્યાત્મસમાધિના ।
યુયુજે ભગવદ્ધામ્નિ બ્રહ્મણ્યનુભવાત્મનિ ॥ ૪૧॥

યર્હ્યુપારતધીસ્તસ્મિન્નદ્રાક્ષીત્પુરુષાન્ પુરઃ ।
ઉપલભ્યોપલબ્ધાન્ પ્રાગ્વવન્દે શિરસા દ્વિજઃ ॥ ૪૨॥

હિત્વા કલેવરં તીર્થે ગઙ્ગાયાં દર્શનાદનુ ।
સદ્યઃ સ્વરૂપં જગૃહે ભગવત્પાર્શ્વવર્તિનામ્ ॥ ૪૩॥

સાકં વિહાયસા વિપ્રો મહાપુરુષકિઙ્કરૈઃ ।
હૈમં વિમાનમારુહ્ય યયૌ યત્ર શ્રિયઃ પતિઃ ॥ ૪૪॥

એવં સ વિપ્લાવિતસર્વધર્મા
દાસ્યાઃ પતિઃ પતિતો ગર્હ્યકર્મણા ।
નિપાત્યમાનો નિરયે હતવ્રતઃ
સદ્યો વિમુક્તો ભગવન્નામ ગૃહ્ણન્ ॥ ૪૫॥

નાતઃ પરં કર્મનિબન્ધકૃન્તનં
મુમુક્ષતાં તીર્થપદાનુકીર્તનાત્ ।
ન યત્પુનઃ કર્મસુ સજ્જતે મનો
રજસ્તમોભ્યાં કલિલં તતોઽન્યથા ॥ ૪૬॥

ય એવં પરમં ગુહ્યમિતિહાસમઘાપહમ્ ।
શ‍ૃણુયાચ્છ્રદ્ધયા યુક્તો યશ્ચ ભક્ત્યાનુકીર્તયેત્ ॥ ૪૭॥

ન વૈ સ નરકં યાતિ નેક્ષિતો યમકિઙ્કરૈઃ ।
યદ્યપ્યમઙ્ગલો મર્ત્યો વિષ્ણુલોકે મહીયતે ॥ ૪૮॥

મ્રિયમાણો હરેર્નામ ગૃણન્ પુત્રોપચારિતમ્ ।
અજામિલોઽપ્યગાદ્ધામ કિં પુનઃ શ્રદ્ધયા ગૃણન્ ॥ ૪૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે અજામિલોપાખ્યાને દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ તૃતીયોઽધ્યાયઃ - ૩ ॥

રાજોવાચ
નિશમ્ય દેવઃ સ્વભટોપવર્ણિતં
પ્રત્યાહ કિં તાન્ પ્રતિ ધર્મરાજઃ ।
એવં હતાજ્ઞો વિહતાન્ મુરારે-
ર્નૈદેશિકૈર્યસ્ય વશે જનોઽયમ્ ॥ ૧॥

યમસ્ય દેવસ્ય ન દણ્ડભઙ્ગઃ
કુતશ્ચનર્ષે શ્રુતપૂર્વ આસીત્ ।
એતન્મુને વૃશ્ચતિ લોકસંશયં
ન હિ ત્વદન્ય ઇતિ મે વિનિશ્ચિતમ્ ॥ ૨॥

શ્રીશુક ઉવાચ
ભગવત્પુરુષૈ રાજન્ યામ્યાઃ પ્રતિહતોદ્યમાઃ ।
પતિં વિજ્ઞાપયામાસુર્યમં સંયમનીપતિમ્ ॥ ૩॥

યમદૂતા ઊચુઃ
કતિ સન્તીહ શાસ્તારો જીવલોકસ્ય વૈ પ્રભો ।
ત્રૈવિધ્યં કુર્વતઃ કર્મ ફલાભિવ્યક્તિહેતવઃ ॥ ૪॥

યદિ સ્યુર્બહવો લોકે શાસ્તારો દણ્ડધારિણઃ ।
કસ્ય સ્યાતાં ન વા કસ્ય મૃત્યુશ્ચામૃતમેવ વા ॥ ૫॥

કિન્તુ શાસ્તૃબહુત્વે સ્યાદ્બહૂનામિહ કર્મિણામ્ ।
શાસ્તૃત્વમુપચારો હિ યથા મણ્ડલવર્તિનામ્ ॥ ૬॥

અતસ્ત્વમેકો ભૂતાનાં સેશ્વરાણામધીશ્વરઃ ।
શાસ્તા દણ્ડધરો નૃણાં શુભાશુભવિવેચનઃ ॥ ૭॥

તસ્ય તે વિહતો દણ્ડો ન લોકે વર્તતેઽધુના ।
ચતુર્ભિરદ્ભુતૈઃ સિદ્ધૈરાજ્ઞા તે વિપ્રલમ્ભિતા ॥ ૮॥

નીયમાનં તવાદેશાદસ્માભિર્યાતનાગૃહાન્ ।
વ્યમોચયન્ પાતકિનં છિત્ત્વા પાશાન્ પ્રસહ્ય તે ॥ ૯॥

તાંસ્તે વેદિતુમિચ્છામો યદિ નો મન્યસે ક્ષમમ્ ।
નારાયણેત્યભિહિતે મા ભૈરિત્યાયયુર્દ્રુતમ્ ॥ ૧૦॥

શ્રીશુક ઉવાચ
ઇતિ દેવઃ સ આપૃષ્ટઃ પ્રજાસંયમનો યમઃ ।
પ્રીતઃ સ્વદૂતાન્ પ્રત્યાહ સ્મરન્ પાદામ્બુજં હરેઃ ॥ ૧૧॥

યમ ઉવાચ
પરો મદન્યો જગતસ્તસ્થુષશ્ચ
ઓતં પ્રોતં પટવદ્યત્ર વિશ્વમ્ ।
યદંશતોઽસ્ય સ્થિતિજન્મનાશા
નસ્યોતવદ્યસ્ય વશે ચ લોકઃ ॥ ૧૨॥

યો નામભિર્વાચિ જનાન્નિજાયાં
બધ્નાતિ તન્ત્ર્યામિવ દામભિર્ગાઃ ।
યસ્મૈ બલિં ત ઇમે નામકર્મ-
નિબન્ધબદ્ધાશ્ચકિતા વહન્તિ ॥ ૧૩॥

અહં મહેન્દ્રો નિરૃતિઃ પ્રચેતાઃ
સોમોઽગ્નિરીશઃ પવનોઽર્કો વિરિઞ્ચઃ ।
આદિત્યવિશ્વે વસવોઽથ સાધ્યા
મરુદ્ગણા રુદ્રગણાઃ સસિદ્ધાઃ ॥ ૧૪॥

અન્યે ચ યે વિશ્વસૃજોઽમરેશા
ભૃગ્વાદયોઽસ્પૃષ્ટરજસ્તમસ્કાઃ ।
યસ્યેહિતં ન વિદુઃ સ્પૃષ્ટમાયાઃ
સત્ત્વપ્રધાના અપિ કિં તતોઽન્યે ॥ ૧૫॥

યં વૈ ન ગોભિર્મનસાસુભિર્વા
હૃદા ગિરા વાસુભૃતો વિચક્ષતે ।
આત્માનમન્તર્હૃદિ સન્તમાત્મનાં

ચક્ષુર્યથૈવાકૃતયસ્તતઃ પરમ્ ॥ ૧૬॥

તસ્યાત્મતન્ત્રસ્ય હરેરધીશિતુઃ
પરસ્ય માયાધિપતેર્મહાત્મનઃ ।
પ્રાયેણ દૂતા ઇહ વૈ મનોહરા-
શ્ચરન્તિ તદ્રૂપગુણસ્વભાવાઃ ॥ ૧૭॥

ભૂતાનિ વિષ્ણોઃ સુરપૂજિતાનિ
દુર્દર્શલિઙ્ગાનિ મહાદ્ભુતાનિ ।
રક્ષન્તિ તદ્ભક્તિમતઃ પરેભ્યો
મત્તશ્ચ મર્ત્યાનથ સર્વતશ્ચ ॥ ૧૮॥

ધર્મં તુ સાક્ષાદ્ભગવત્પ્રણીતં
ન વૈ વિદુરૃષયો નાપિ દેવાઃ ।
ન સિદ્ધમુખ્યા અસુરા મનુષ્યાઃ
કુતશ્ચ વિદ્યાધરચારણાદયઃ ॥ ૧૯॥

સ્વયમ્ભૂર્નારદઃ શમ્ભુઃ કુમારઃ કપિલો મનુઃ ।
પ્રહ્લાદો જનકો ભીષ્મો બલિર્વૈયાસકિર્વયમ્ ॥ ૨૦॥

દ્વાદશૈતે વિજાનીમો ધર્મં ભાગવતં ભટાઃ ।
ગુહ્યં વિશુદ્ધં દુર્બોધં યં જ્ઞાત્વામૃતમશ્નુતે ॥ ૨૧॥

એતાવાનેવ લોકેઽસ્મિન્ પુંસાં ધર્મઃ પરઃ સ્મૃતઃ ।
ભક્તિયોગો ભગવતિ તન્નામગ્રહણાદિભિઃ ॥ ૨૨॥

નામોચ્ચારણમાહાત્મ્યં હરેઃ પશ્યત પુત્રકાઃ ।
અજામિલોઽપિ યેનૈવ મૃત્યુપાશાદમુચ્યત ॥ ૨૩॥

એતાવતાલમઘનિર્હરણાય પુંસાં
સઙ્કીર્તનં ભગવતો ગુણકર્મનામ્નામ્ ।
વિક્રુશ્ય પુત્રમઘવાન્ યદજામિલોઽપિ
નારાયણેતિ મ્રિયમાણ ઇયાય મુક્તિમ્ ॥ ૨૪॥

પ્રાયેણ વેદ તદિદં ન મહાજનોઽયં
દેવ્યા વિમોહિતમતિર્બત માયયાલમ્ ।
ત્રય્યાં જડીકૃતમતિર્મધુપુષ્પિતાયાં
વૈતાનિકે મહતિ કર્મણિ યુજ્યમાનઃ ॥ ૨૫॥

એવં વિમૃશ્ય સુધિયો ભગવત્યનન્તે
સર્વાત્મના વિદધતે ખલુ ભાવયોગમ્ ।
તે મે ન દણ્ડમર્હન્ત્યથ યદ્યમીષાં
સ્યાત્પાતકં તદપિ હન્ત્યુરુગાયવાદઃ ॥ ૨૬॥

તે દેવસિદ્ધપરિગીતપવિત્રગાથાઃ
યે સાધવઃ સમદૃશો ભગવત્પ્રપન્નાઃ ।
તાન્ નોપસીદત હરેર્ગદયાભિગુપ્તાન્
નૈષાં વયં ન ચ વયઃ પ્રભવામ દણ્ડે ॥ ૨૭॥

તાનાનયધ્વમસતો વિમુખાન્ મુકુન્દ-
પાદારવિન્દમકરન્દરસાદજસ્રમ્ ।
નિષ્કિઞ્ચનૈઃ પરમહંસકુલૈ રસજ્ઞૈઃ
જુષ્ટાદ્ગૃહે નિરયવર્ત્મનિ બદ્ધતૃષ્ણાન્ ॥ ૨૮॥

જિહ્વા ન વક્તિ ભગવદ્ગુણનામધેયં
ચેતશ્ચ ન સ્મરતિ તચ્ચરણારવિન્દમ્ ।
કૃષ્ણાય નો નમતિ યચ્છિર એકદાપિ
તાનાનયધ્વમસતોઽકૃતવિષ્ણુકૃત્યાન્ ॥ ૨૯॥

તત્ક્ષમ્યતાં સ ભગવાન્ પુરુષઃ પુરાણો
નારાયણઃ સ્વપુરુષૈર્યદસત્કૃતં નઃ ।
સ્વાનામહો ન વિદુષાં રચિતાઞ્જલીનાં
ક્ષાન્તિર્ગરીયસિ નમઃ પુરુષાય ભૂમ્ને ॥ ૩૦॥

તસ્માત્સઙ્કીર્તનં વિષ્ણોર્જગન્મઙ્ગલમંહસામ્ ।
મહતામપિ કૌરવ્ય વિદ્ધ્યૈકાન્તિકનિષ્કૃતિમ્ ॥ ૩૧॥

શ‍ૃણ્વતાં ગૃણતાં વીર્યાણ્યુદ્દામાનિ હરેર્મુહુઃ ।
યથા સુજાતયા ભક્ત્યા શુદ્ધ્યેન્નાત્મા વ્રતાદિભિઃ ॥ ૩૨॥

કૃષ્ણાઙ્ઘ્રિપદ્મમધુલિણ્ ન પુનર્વિસૃષ્ટ-
માયાગુણેષુ રમતે વૃજિનાવહેષુ ।
અન્યસ્તુ કામહત આત્મરજઃ પ્રમાર્ષ્ટુ-
મીહેત કર્મ યત એવ રજઃ પુનઃ સ્યાત્ ॥ ૩૩॥

ઇત્થં સ્વભર્તૃગદિતં ભગવન્મહિત્વં

સંસ્મૃત્ય વિસ્મિતધિયો યમકિઙ્કરાસ્તે ।
નૈવાચ્યુતાશ્રયજનં પ્રતિશઙ્કમાના
દ્રષ્ટું ચ બિભ્યતિ તતઃ પ્રભૃતિ સ્મ રાજન્ ॥ ૩૪॥

ઇતિહાસમિમં ગુહ્યં ભગવાન્ કુમ્ભસમ્ભવઃ ।
કથયામાસ મલયે આસીનો હરિમર્ચયન્ ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે યમપુરુષસંવાદે તૃતીયોઽધ્યાયઃ ॥ ૩॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ચતુર્થોઽધ્યાયઃ - ૪ ॥

રાજોવાચ
દેવાસુરનૃણાં સર્ગો નાગાનાં મૃગપક્ષિણામ્ ।
સામાસિકસ્ત્વયા પ્રોક્તો યસ્તુ સ્વાયમ્ભુવેઽન્તરે ॥ ૧॥

તસ્યૈવ વ્યાસમિચ્છામિ જ્ઞાતું તે ભગવન્ યથા ।
અનુસર્ગં યયા શક્ત્યા સસર્જ ભગવાન્ પરઃ ॥ ૨॥

સૂત ઉવાચ
ઇતિ સમ્પ્રશ્નમાકર્ણ્ય રાજર્ષેર્બાદરાયણિઃ ।
પ્રતિનન્દ્ય મહાયોગી જગાદ મુનિસત્તમાઃ ॥ ૩॥

શ્રીશુક ઉવાચ
યદા પ્રચેતસઃ પુત્રા દશ પ્રાચીનબર્હિષઃ ।
અન્તઃસમુદ્રાદુન્મગ્ના દદૃશુર્ગાં દ્રુમૈર્વૃતામ્ ॥ ૪॥

દ્રુમેભ્યઃ ક્રુધ્યમાનાસ્તે તપોદીપિતમન્યવઃ ।
મુખતો વાયુમગ્નિં ચ સસૃજુસ્તદ્દિધક્ષયા ॥ ૫॥

તાભ્યાં નિર્દહ્યમાનાંસ્તાનુપલભ્ય કુરૂદ્વહ ।
રાજોવાચ મહાન્ સોમો મન્યું પ્રશમયન્નિવ ॥ ૬॥

ન દ્રુમેભ્યો મહાભાગા દીનેભ્યો દ્રોગ્ધુમર્હથ ।

વિવર્ધયિષવો યૂયં પ્રજાનાં પતયઃ સ્મૃતાઃ ॥ ૭॥

અહો પ્રજાપતિપતિર્ભગવાન્ હરિરવ્યયઃ ।
વનસ્પતીનોષધીશ્ચ સસર્જોર્જમિષં વિભુઃ ॥ ૮॥

અન્નં ચરાણામચરા હ્યપદઃ પાદચારિણામ્ ।
અહસ્તા હસ્તયુક્તાનાં દ્વિપદાં ચ ચતુષ્પદઃ ॥ ૯॥

યૂયં ચ પિત્રાન્વાદિષ્ટા દેવદેવેન ચાનઘાઃ ।
પ્રજાસર્ગાય હિ કથં વૃક્ષાન્ નિર્દગ્ધુમર્હથ ॥ ૧૦॥

આતિષ્ઠત સતાં માર્ગં કોપં યચ્છત દીપિતમ્ ।
પિત્રા પિતામહેનાપિ જુષ્ટં વઃ પ્રપિતામહૈઃ ॥ ૧૧॥

તોકાનાં પિતરૌ બન્ધૂ દૃશઃ પક્ષ્મ સ્ત્રિયાઃ પતિઃ ।
પતિઃ પ્રજાનાં ભિક્ષૂણાં ગૃહ્યજ્ઞાનાં બુધઃ સુહૃત્ ॥ ૧૨॥

અન્તર્દેહેષુ ભૂતાનામાત્માऽऽસ્તે હરિરીશ્વરઃ ।
સર્વં તદ્ધિષ્ણ્યમીક્ષધ્વમેવં વસ્તોષિતો હ્યસૌ ॥ ૧૩॥

યઃ સમુત્પતિતં દેહ આકાશાન્મન્યુમુલ્બણમ્ ।
આત્મજિજ્ઞાસયા યચ્છેત્સ ગુણાનતિવર્તતે ॥ ૧૪॥

અલં દગ્ધૈર્દ્રુમૈર્દીનૈઃ ખિલાનાં શિવમસ્તુ વઃ ।
વાર્ક્ષી હ્યેષા વરા કન્યા પત્નીત્વે પ્રતિગૃહ્યતામ્ ॥ ૧૫॥

ઇત્યામન્ત્ર્ય વરારોહાં કન્યામાપ્સરસીં નૃપ ।
સોમો રાજા યયૌ દત્ત્વા તે ધર્મેણોપયેમિરે ॥ ૧૬॥

તેભ્યસ્તસ્યાં સમભવદ્દક્ષઃ પ્રાચેતસઃ કિલ ।
યસ્ય પ્રજાવિસર્ગેણ લોકા આપૂરિતાસ્ત્રયઃ ॥ ૧૭॥

યથા સસર્જ ભૂતાનિ દક્ષો દુહિતૃવત્સલઃ ।
રેતસા મનસા ચૈવ તન્મમાવહિતઃ શ‍ૃણુ ॥ ૧૮॥

મનસૈવાસૃજત્પૂર્વં પ્રજાપતિરિમાઃ પ્રજાઃ ।
દેવાસુરમનુષ્યાદીન્ નભઃસ્થલજલૌકસઃ ॥ ૧૯॥

તમબૃંહિતમાલોક્ય પ્રજાસર્ગં પ્રજાપતિઃ ।
વિન્ધ્યપાદાનુપવ્રજ્ય સોઽચરદ્દુષ્કરં તપઃ ॥ ૨૦॥

તત્રાઘમર્ષણં નામ તીર્થં પાપહરં પરમ્ ।
ઉપસ્પૃશ્યાનુસવનં તપસાતોષયદ્ધરિમ્ ॥ ૨૧॥

અસ્તૌષીદ્ધંસગુહ્યેન ભગવન્તમધોક્ષજમ્ ।
તુભ્યં તદભિધાસ્યામિ કસ્યાતુષ્યદ્યથા હરિઃ ॥ ૨૨॥

પ્રજાપતિરુવાચ
નમઃ પરાયાવિતથાનુભૂતયે
ગુણત્રયાભાસનિમિત્તબન્ધવે ।
અદૃષ્ટધામ્ને ગુણતત્ત્વબુદ્ધિભિ-
ર્નિવૃત્તમાનાય દધે સ્વયમ્ભુવે ॥ ૨૩॥

ન યસ્ય સખ્યં પુરુષોઽવૈતિ સખ્યુઃ
સખા વસન્ સંવસતઃ પુરેઽસ્મિન્ ।
ગુણો યથા ગુણિનો વ્યક્તદૃષ્ટે-
સ્તસ્મૈ મહેશાય નમસ્કરોમિ ॥ ૨૪॥

દેહોઽસવોઽક્ષા મનવો ભૂતમાત્રા
નાત્માનમન્યં ચ વિદુઃ પરં યત્ ।
સર્વં પુમાન્ વેદ ગુણાંશ્ચ તજ્જ્ઞો
ન વેદ સર્વજ્ઞમનન્તમીડે ॥ ૨૫॥

યદોપરામો મનસો નામરૂપ-
રૂપસ્ય દૃષ્ટસ્મૃતિસમ્પ્રમોષાત્ ।
ય ઈયતે કેવલયા સ્વસંસ્થયા
હંસાય તસ્મૈ શુચિસદ્મને નમઃ ॥ ૨૬॥

મનીષિણોઽન્તર્હૃદિ સન્નિવેશિતં
સ્વશક્તિભિર્નવભિશ્ચ ત્રિવૃદ્ભિઃ ।
વહ્નિં યથા દારુણિ પાઞ્ચદશ્યં
મનીષયા નિષ્કર્ષન્તિ ગૂઢમ્ ॥ ૨૭॥

સ વૈ મમાશેષવિશેષમાયા-
નિષેધનિર્વાણસુખાનુભૂતિઃ ।
સ સર્વનામા સ ચ વિશ્વરૂપઃ
પ્રસીદતામનિરુક્તાત્મશક્તિઃ ॥ ૨૮॥

યદ્યન્નિરુક્તં વચસા નિરૂપિતં
ધિયાક્ષભિર્વા મનસોઽત યસ્ય ।
મા ભૂત્સ્વરૂપં ગુણરૂપં હિ તત્ત-
ત્સ વૈ ગુણાપાયવિસર્ગલક્ષણઃ ॥ ૨૯॥

યસ્મિન્ યતો યેન ચ યસ્ય યસ્મૈ
યદ્યો યથા કુરુતે કાર્યતે ચ ।
પરાવરેષાં પરમં પ્રાક્પ્રસિદ્ધં
તદ્બ્રહ્મ તદ્ધેતુરનન્યદેકમ્ ॥ ૩૦॥

યચ્છક્તયો વદતાં વાદિનાં વૈ
વિવાદસંવાદભુવો ભવન્તિ ।
કુર્વન્તિ ચૈષાં મુહુરાત્મમોહં
તસ્મૈ નમોઽનન્તગુણાય ભૂમ્ને ॥ ૩૧॥

અસ્તીતિ નાસ્તીતિ ચ વસ્તુનિષ્ઠયો-
રેકસ્થયોર્ભિન્નવિરુદ્ધધર્મયોઃ ।
અવેક્ષિતં કિઞ્ચન યોગસાઙ્ખ્યયોઃ
સમં પરં હ્યનુકૂલં બૃહત્તત્ ॥ ૩૨॥

યોઽનુગ્રહાર્થં ભજતાં પાદમૂલ-
મનામરૂપો ભગવાનનન્તઃ ।
નામાનિ રૂપાણિ ચ જન્મકર્મભિ-
ર્ભેજે સ મહ્યં પરમઃ પ્રસીદતુ ॥ ૩૩॥

યઃ પ્રાકૃતૈર્જ્ઞાનપથૈર્જનાનાં
યથાશયં દેહગતો વિભાતિ ।
યથાનિલઃ પાર્થિવમાશ્રિતો ગુણં
સ ઈશ્વરો મે કુરુતાન્મનોરથમ્ ॥ ૩૪॥

શ્રીશુક ઉવાચ
ઇતિ સ્તુતઃ સંસ્તુવતઃ સ તસ્મિન્નઘમર્ષણે ।
આવિરાસીત્કુરુશ્રેષ્ઠ ભગવાન્ ભક્તવત્સલઃ ॥ ૩૫॥

કૃતપાદઃ સુપર્ણાંસે પ્રલમ્બાષ્ટમહાભુજઃ ।
ચક્રશઙ્ખાસિચર્મેષુ ધનુઃપાશગદાધરઃ ॥ ૩૬॥

પીતવાસા ઘનશ્યામઃ પ્રસન્નવદનેક્ષણઃ ।
વનમાલાનિવીતાઙ્ગો લસચ્છ્રીવત્સકૌસ્તુભઃ ॥ ૩૭॥

મહાકિરીટકટકઃ સ્ફુરન્મકરકુણ્ડલઃ ।
કાઞ્ચ્યઙ્ગુલીયવલયનૂપુરાઙ્ગદભૂષિતઃ ॥ ૩૮॥

ત્રૈલોક્યમોહનં રૂપં બિભ્રત્ત્રિભુવનેશ્વરઃ ।
વૃતો નારદનન્દાદ્યૈઃ પાર્ષદૈઃ સુરયૂથપૈઃ ॥ ૩૯॥

સ્તૂયમાનોઽનુગાયદ્ભિઃ સિદ્ધગન્ધર્વચારણૈઃ ।
રૂપં તન્મહદાશ્ચર્યં વિચક્ષ્યાગતસાધ્વસઃ ॥ ૪૦॥

નનામ દણ્ડવદ્ભૂમૌ પ્રહૃષ્ટાત્મા પ્રજાપતિઃ ।
ન કિઞ્ચનોદીરયિતુમશકત્તીવ્રયા મુદા ।
આપૂરિતમનોદ્વારૈર્હ્રદિન્ય ઇવ નિર્ઝરૈઃ ॥ ૪૧॥

તં તથાવનતં ભક્તં પ્રજાકામં પ્રજાપતિમ્ ।
ચિત્તજ્ઞઃ સર્વભૂતાનામિદમાહ જનાર્દનઃ ॥ ૪૨॥

શ્રીભગવાનુવાચ
પ્રાચેતસ મહાભાગ સંસિદ્ધસ્તપસા ભવાન્ ।
યચ્છ્રદ્ધયા મત્પરયા મયિ ભાવં પરં ગતઃ ॥ ૪૩॥

પ્રીતોઽહં તે પ્રજાનાથ યત્તેઽસ્યોદ્બૃંહણં તપઃ ।
મમૈષ કામો ભૂતાનાં યદ્ભૂયાસુર્વિભૂતયઃ ॥ ૪૪॥

બ્રહ્મા ભવો ભવન્તશ્ચ મનવો વિબુધેશ્વરાઃ ।
વિભૂતયો મમ હ્યેતા ભૂતાનાં ભૂતિહેતવઃ ॥ ૪૫॥

તપો મે હૃદયં બ્રહ્મંસ્તનુર્વિદ્યા ક્રિયાઽઽકૃતિઃ ।
અઙ્ગાનિ ક્રતવો જાતા ધર્મ આત્માસવઃ સુરાઃ ॥ ૪૬॥

અહમેવાસમેવાગ્રે નાન્યત્કિઞ્ચાન્તરં બહિઃ ।
સંજ્ઞાનમાત્રમવ્યક્તં પ્રસુપ્તમિવ વિશ્વતઃ ॥ ૪૭॥

મય્યનન્તગુણેઽનન્તે ગુણતો ગુણવિગ્રહઃ ।
યદાસીત્તત એવાદ્યઃ સ્વયમ્ભૂઃ સમભૂદજઃ ॥ ૪૮॥

સ વૈ યદા મહાદેવો મમ વીર્યોપબૃંહિતઃ ।
મેને ખિલમિવાત્માનમુદ્યતઃ સર્ગકર્મણિ ॥ ૪૯॥

અથ મેઽભિહિતો દેવસ્તપોઽતપ્યત દારુણમ્ ।
નવ વિશ્વસૃજો યુષ્માન્ યેનાદાવસૃજદ્વિભુઃ ॥ ૫૦॥

એષા પઞ્ચજનસ્યાઙ્ગ દુહિતા વૈ પ્રજાપતેઃ ।
અસિક્ની નામ પત્નીત્વે પ્રજેશ પ્રતિગૃહ્યતામ્ ॥ ૫૧॥

મિથુનવ્યવાયધર્મસ્ત્વં પ્રજાસર્ગમિમં પુનઃ ।
મિથુનવ્યવાયધર્મિણ્યાં ભૂરિશો ભાવયિષ્યસિ ॥ ૫૨॥

ત્વત્તોઽધસ્તાત્પ્રજાઃ સર્વા મિથુનીભૂય માયયા ।
મદીયયા ભવિષ્યન્તિ હરિષ્યન્તિ ચ મે બલિમ્ ॥ ૫૩॥

શ્રીશુક ઉવાચ
ઇત્યુક્ત્વા મિષતસ્તસ્ય ભગવાન્ વિશ્વભાવનઃ ।
સ્વપ્નોપલબ્ધાર્થ ઇવ તત્રૈવાન્તર્દધે હરિઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ચતુર્થોઽધ્યાયઃ ॥ ૪॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ પઞ્ચમોઽધ્યાયઃ - ૫ ॥

શ્રીશુક ઉવાચ
તસ્યાં સ પાઞ્ચજન્યાં વૈ વિષ્ણુમાયોપબૃંહિતઃ ।
હર્યશ્વસંજ્ઞાનયુતં પુત્રાનજનયદ્વિભુઃ ॥ ૧॥

અપૃથગ્ધર્મશીલાસ્તે સર્વે દાક્ષાયણા નૃપ ।
પિત્રા પ્રોક્તાઃ પ્રજાસર્ગે પ્રતીચીં પ્રયયુર્દિશમ્ ॥ ૨॥

તત્ર નારાયણસરસ્તીર્થં સિન્ધુસમુદ્રયોઃ ।
સઙ્ગમો યત્ર સુમહન્મુનિસિદ્ધનિષેવિતમ્ ॥ ૩॥

તદુપસ્પર્શનાદેવ વિનિર્ધૂતમલાશયાઃ ।
ધર્મે પારમહંસ્યે ચ પ્રોત્પન્નમતયોઽપ્યુત ॥ ૪॥

તેપિરે તપ એવોગ્રં પિત્રાદેશેન યન્ત્રિતાઃ ।

પ્રજાવિવૃદ્ધયે યત્તાન્ દેવર્ષિસ્તાન્ દદર્શ હ ॥ ૫॥

ઉવાચ ચાથ હર્યશ્વાઃ કથં સ્રક્ષ્યથ વૈ પ્રજાઃ ।
અદૃષ્ટ્વાન્તં ભુવો યૂયં બાલિશા બત પાલકાઃ ॥ ૬॥

તથૈકપુરુષં રાષ્ટ્રં બિલં ચાદૃષ્ટનિર્ગમમ્ ।
બહુરૂપાં સ્ત્રિયં ચાપિ પુમાંસં પુંશ્ચલીપતિમ્ ॥ ૭॥

નદીમુભયતો વાહાં પઞ્ચપઞ્ચાદ્ભુતં ગૃહમ્ ।
ક્વચિદ્ધંસં ચિત્રકથં ક્ષૌરપવ્યં સ્વયમ્ભ્રમિમ્ ॥ ૮॥

કથં સ્વપિતુરાદેશમવિદ્વાંસો વિપશ્ચિતઃ ।
અનુરૂપમવિજ્ઞાય અહો સર્ગં કરિષ્યથ ॥ ૯॥

શ્રીશુક ઉવાચ
તન્નિશમ્યાથ હર્યશ્વા ઔત્પત્તિકમનીષયા ।
વાચઃ કૂટં તુ દેવર્ષેઃ સ્વયં વિમમૃશુર્ધિયા ॥ ૧૦॥

ભૂઃ ક્ષેત્રં જીવસંજ્ઞં યદનાદિ નિજબન્ધનમ્ ।
અદૃષ્ટ્વા તસ્ય નિર્વાણં કિમસત્કર્મભિર્ભવેત્ ॥ ૧૧॥

એક એવેશ્વરસ્તુર્યો ભગવાન્ સ્વાશ્રયઃ પરઃ ।
તમદૃષ્ટ્વાભવં પુંસઃ કિમસત્કર્મભિર્ભવેત્ ॥ ૧૨॥

પુમાન્ નૈવૈતિ યદ્ગત્વા બિલસ્વર્ગં ગતો યથા ।
પ્રત્યગ્ધામાવિદ ઇહ કિમસત્કર્મભિર્ભવેત્ ॥ ૧૩॥

નાનારૂપાત્મનો બુદ્ધિઃ સ્વૈરિણીવ ગુણાન્વિતા ।
તન્નિષ્ઠામગતસ્યેહ કિમસત્કર્મભિર્ભવેત્ ॥ ૧૪॥

તત્સઙ્ગભ્રંશિતૈશ્વર્યં સંસરન્તં કુભાર્યવત્ ।
તદ્ગતીરબુધસ્યેહ કિમસત્કર્મભિર્ભવેત્ ॥ ૧૫॥

સૃષ્ટ્યપ્યયકરીં માયાં વેલાકૂલાન્તવેગિતામ્ ।
મત્તસ્ય તામવિજ્ઞસ્ય કિમસત્કર્મભિર્ભવેત્ ॥ ૧૬॥

પઞ્ચવિંશતિતત્ત્વાનાં પુરુષોઽદ્ભુતદર્પણમ્ ।
અધ્યાત્મમબુધસ્યેહ કિમસત્કર્મભિર્ભવેત્ ॥ ૧૭॥

ઐશ્વરં શાસ્ત્રમુત્સૃજ્ય બન્ધમોક્ષાનુદર્શનમ્ ।
વિવિક્તપદમજ્ઞાય કિમસત્કર્મભિર્ભવેત્ ॥ ૧૮॥

કાલચક્રં ભ્રમિસ્તીક્ષ્ણં સર્વં નિષ્કર્ષયજ્જગત્ ।
સ્વતન્ત્રમબુધસ્યેહ કિમસત્કર્મભિર્ભવેત્ ॥ ૧૯॥

શાસ્ત્રસ્ય પિતુરાદેશં યો ન વેદ નિવર્તકમ્ ।
કથં તદનુરૂપાય ગુણવિસ્રમ્ભ્યુપક્રમેત્ ॥ ૨૦॥

ઇતિ વ્યવસિતા રાજન્ હર્યશ્વા એકચેતસઃ ।
પ્રયયુસ્તં પરિક્રમ્ય પન્થાનમનિવર્તનમ્ ॥ ૨૧॥

સ્વરબ્રહ્મણિ નિર્ભાતહૃષીકેશપદામ્બુજે ।
અખણ્ડં ચિત્તમાવેશ્ય લોકાનનુચરન્ મુનિઃ ॥ ૨૨॥

નાશં નિશમ્ય પુત્રાણાં નારદાચ્છીલશાલિનામ્ ।
અન્વતપ્યત કઃ શોચન્ સુપ્રજાસ્ત્વં શુચાં પદમ્ ॥ ૨૩॥

સ ભૂયઃ પાઞ્ચજન્યાયામજેન પરિસાન્ત્વિતઃ ।
પુત્રાનજનયદ્દક્ષઃ શબલાશ્વાન્ સહસ્રશઃ ॥ ૨૪॥

તેઽપિ પિત્રા સમાદિષ્ટાઃ પ્રજાસર્ગે ધૃતવ્રતાઃ ।
નારાયણસરો જગ્મુર્યત્ર સિદ્ધાઃ સ્વપૂર્વજાઃ ॥ ૨૫॥

તદુપસ્પર્શનાદેવ વિનિર્ધૂતમલાશયાઃ ।
જપન્તો બ્રહ્મ પરમં તેપુસ્તેઽત્ર મહત્તપઃ ॥ ૨૬॥

અબ્ભક્ષાઃ કતિચિન્માસાન્ કતિચિદ્વાયુભોજનાઃ ।
આરાધયન્ મન્ત્રમિમમભ્યસ્યન્ત ઇડસ્પતિમ્ ॥ ૨૭॥

ઓં નમો નારાયણાય પુરુષાય મહાત્મને ।
વિશુદ્ધસત્ત્વધિષ્ણ્યાય મહાહંસાય ધીમહિ ॥ ૨૮॥

ઇતિ તાનપિ રાજેન્દ્ર પ્રતિસર્ગધિયો મુનિઃ ।
ઉપેત્ય નારદઃ પ્રાહ વાચઃ કૂટાનિ પૂર્વવત્ ॥ ૨૯॥

દાક્ષાયણાઃ સંશ‍ૃણુત ગદતો નિગમં મમ ।
અન્વિચ્છતાનુપદવીં ભ્રાતૄણાં ભ્રાતૃવત્સલાઃ ॥ ૩૦॥

ભ્રાતૄણાં પ્રાયણં ભ્રાતા યોઽનુતિષ્ઠતિ ધર્મવિત્ ।
સ પુણ્યબન્ધુઃ પુરુષો મરુદ્ભિઃ સહ મોદતે ॥ ૩૧॥

એતાવદુક્ત્વા પ્રયયૌ નારદોઽમોઘદર્શનઃ ।

તેऽપિ ચાન્વગમન્ માર્ગં ભ્રાતૄણામેવ મારિષ ॥ ૩૨॥

સધ્રીચીનં પ્રતીચીનં પરસ્યાનુપથં ગતાઃ ।
નાદ્યાપિ તે નિવર્તન્તે પશ્ચિમા યામિનીરિવ ॥ ૩૩॥

એતસ્મિન્ કાલ ઉત્પાતાન્ બહૂન્ પશ્યન્ પ્રજાપતિઃ ।
પૂર્વવન્નારદકૃતં પુત્રનાશમુપાશ઼ૃણોત્ ॥ ૩૪॥

ચુક્રોધ નારદાયાસૌ પુત્રશોકવિમૂર્ચ્છિતઃ ।
દેવર્ષિમુપલભ્યાહ રોષાદ્વિસ્ફુરિતાધરઃ ॥ ૩૫॥

દક્ષ ઉવાચ
અહો અસાધો સાધૂનાં સાધુલિઙ્ગેન નસ્ત્વયા ।
અસાધ્વકાર્યર્ભકાણાં ભિક્ષોર્માર્ગઃ પ્રદર્શિતઃ ॥ ૩૬॥

ઋણૈસ્ત્રિભિરમુક્તાનામમીમાંસિતકર્મણામ્ ।
વિઘાતઃ શ્રેયસઃ પાપ લોકયોરુભયોઃ કૃતઃ ॥ ૩૭॥

એવં ત્વં નિરનુક્રોશો બાલાનાં મતિભિદ્ધરેઃ ।
પાર્ષદમધ્યે ચરસિ યશોહા નિરપત્રપઃ ॥ ૩૮॥

નનુ ભાગવતા નિત્યં ભૂતાનુગ્રહકાતરાઃ ।
ઋતે ત્વાં સૌહૃદઘ્નં વૈ વૈરઙ્કરમવૈરિણામ્ ॥ ૩૯॥

નેત્થં પુંસાં વિરાગઃ સ્યાત્ત્વયા કેવલિના મૃષા ।
મન્યસે યદ્યુપશમં સ્નેહપાશનિકૃન્તનમ્ ॥ ૪૦॥

નાનુભૂય ન જાનાતિ પુમાન્ વિષયતીક્ષ્ણતામ્ ।
નિર્વિદ્યતે સ્વયં તસ્માન્ન તથા ભિન્નધીઃ પરૈઃ ॥ ૪૧॥

યન્નસ્ત્વં કર્મસન્ધાનાં સાધૂનાં ગૃહમેધિનામ્ ।
કૃતવાનસિ દુર્મર્ષં વિપ્રિયં તવ મર્ષિતમ્ ॥ ૪૨॥

તન્તુકૃન્તન યન્નસ્ત્વમભદ્રમચરઃ પુનઃ ।
તસ્માલ્લોકેષુ તે મૂઢ ન ભવેદ્ભ્રમતઃ પદમ્ ॥ ૪૩॥

શ્રીશુક ઉવાચ
પ્રતિજગ્રાહ તદ્બાઢં નારદઃ સાધુસમ્મતઃ ।
એતાવાન્ સાધુવાદો હિ તિતિક્ષેતેશ્વરઃ સ્વયમ્ ॥ ૪૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં

ષષ્ઠસ્કન્ધે નારદશાપો નામ પઞ્ચમોऽધ્યાયઃ ॥ ૫॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ષષ્ઠોऽધ્યાયઃ - ૬ ॥

શ્રીશુક ઉવાચ
તતઃ પ્રાચેતસોऽસિક્ન્યામનુનીતઃ સ્વયમ્ભુવા ।
ષષ્ટિં સઞ્જનયામાસ દુહિતૄઃ પિતૃવત્સલાઃ ॥ ૧॥

દશ ધર્માય કાયેન્દોર્દ્વિષટ્ત્રિણવ દત્તવાન્ ।
ભૂતાઙ્ગિરઃકૃશાશ્વેભ્યો દ્વે દ્વે તાર્ક્ષ્યાય ચાપરાઃ ॥ ૨॥

નામધેયાન્યમૂષાં ત્વં સાપત્યાનાં ચ મે શૃણુ ।
યાસાં પ્રસૂતિપ્રસવૈર્લોકા આપૂરિતાસ્ત્રયઃ ॥ ૩॥

ભાનુર્લમ્બા કકુદ્યામિર્વિશ્વા સાધ્યા મરુત્વતી ।
વસુર્મુહૂર્તા સઙ્કલ્પા ધર્મપત્ન્યઃ સુતાઞ્છૃણુ ॥ ૪॥

ભાનોસ્તુ દેવઋષભ ઇન્દ્રસેનસ્તતો નૃપ ।
વિદ્યોત આસીલ્લમ્બાયાસ્તતશ્ચ સ્તનયિત્નવઃ ॥ ૫॥

કકુદઃ સઙ્કટસ્તસ્ય કીકટસ્તનયો યતઃ ।
ભુવો દુર્ગાણિ જામેયઃ સ્વર્ગો નન્દિસ્તતોऽભવત્ ॥ ૬॥

વિશ્વેદેવાસ્તુ વિશ્વાયા અપ્રજાંસ્તાન્ પ્રચક્ષતે ।
સાધ્યોગણસ્તુ સાધ્યાયા અર્થસિદ્ધિસ્તુ તત્સુતઃ ॥ ૭॥

મરુત્વાંશ્ચ જયન્તશ્ચ મરુત્વત્યાં બભૂવતુઃ ।
જયન્તો વાસુદેવાંશ ઉપેન્દ્ર ઇતિ યં વિદુઃ ॥ ૮॥

મૌહૂર્તિકા દેવગણા મુહૂર્તાયાશ્ચ જજ્ઞિરે ।
યે વૈ ફલં પ્રયચ્છન્તિ ભૂતાનાં સ્વસ્વકાલજમ્ ॥ ૯॥

સઙ્કલ્પાયાશ્ચ સઙ્કલ્પઃ કામઃ સઙ્કલ્પજઃ સ્મૃતઃ ।
વસવોऽષ્ટૌ વસોઃ પુત્રાસ્તેષાં નામાનિ મે શૃણુ ॥ ૧૦॥

દ્રોણઃ પ્રાણો ધ્રુવોઽર્કોઽગ્નિર્દોષો વસુર્વિભાવસુઃ ।
દ્રોણસ્યાભિમતેઃ પત્ન્યા હર્ષશોકભયાદયઃ ॥ ૧૧॥

પ્રાણસ્યોર્જસ્વતી ભાર્યા સહ આયુઃ પુરોજવઃ ।
ધ્રુવસ્ય ભાર્યા ધરણિરસૂત વિવિધાઃ પુરઃ ॥ ૧૨॥

અર્કસ્ય વાસના ભાર્યા પુત્રાસ્તર્ષાદયઃ સ્મૃતાઃ ।
અગ્નેર્ભાર્યા વસોર્ધારા પુત્રા દ્રવિણકાદયઃ ॥ ૧૩॥

સ્કન્દશ્ચ કૃત્તિકાપુત્રો યે વિશાખાદયસ્તતઃ ।
દોષસ્ય શર્વરીપુત્રઃ શિશુમારો હરેઃ કલા ॥ ૧૪॥

વસોરાઙ્ગિરસીપુત્રો વિશ્વકર્મા કૃતીપતિઃ ।
તતો મનુશ્ચાક્ષુષોઽભૂદ્વિશ્વે સાધ્યા મનોઃ સુતાઃ ॥ ૧૫॥

વિભાવસોરસૂતોષા વ્યુષ્ટં રોચિષમાતપમ્ ।
પઞ્ચયામોઽથ ભૂતાનિ યેન જાગ્રતિ કર્મસુ ॥ ૧૬॥

સરૂપાસૂત ભૂતસ્ય ભાર્યા રુદ્રાંશ્ચ કોટિશઃ ।
રૈવતોઽજો ભવો ભીમો વામ ઉગ્રો વૃષાકપિઃ ॥ ૧૭॥

અજૈકપાદહિર્બુધ્ન્યો બહુરૂપો મહાનિતિ ।
રુદ્રસ્ય પાર્ષદાશ્ચાન્યે ઘોરાઃ ભૂતવિનાયકાઃ ॥ ૧૮॥

પ્રજાપતેરઙ્ગિરસઃ સ્વધા પત્ની પિતૄનથ ।
અથર્વાઙ્ગિરસં વેદં પુત્રત્વે ચાકરોત્સતી ॥ ૧૯॥

કૃશાશ્વોઽર્ચિષિ ભાર્યાયાં ધૂમ્રકેશમજીજનત્ ।
ધિષણાયાં વેદશિરો દેવલં વયુનં મનુમ્ ॥ ૨૦॥

તાર્ક્ષ્યસ્ય વિનતા કદ્રૂઃ પતઙ્ગી યામિનીતિ ચ ।
પતઙ્ગ્યસૂત પતગાન્ યામિની શલભાનથ ॥ ૨૧॥

સુપર્ણાસૂત ગરુડં સાક્ષાદ્યજ્ઞેશવાહનમ્ ।
સૂર્યસૂતમનૂરું ચ કદ્રૂર્નાગાનનેકશઃ ॥ ૨૨॥

કૃત્તિકાદીનિ નક્ષત્રાણીન્દોઃ પત્ન્યસ્તુ ભારત ।
દક્ષશાપાત્સોઽનપત્યસ્તાસુ યક્ષ્મગ્રહાર્દિતઃ ॥ ૨૩॥

પુનઃ પ્રસાદ્ય તં સોમઃ કલા લેભે ક્ષયે દિતાઃ ।
શ઼ૃણુ નામાનિ લોકાનાં માતૄણાં શઙ્કરાણિ ચ ॥ ૨૪॥

અથ કશ્યપપત્નીનાં યત્પ્રસૂતમિદં જગત્ ।
અદિતિર્દિતિર્દનુઃ કાષ્ઠા અરિષ્ટા સુરસા ઇલા ॥ ૨૫॥

મુનિઃ ક્રોધવશા તામ્રા સુરભિઃ સરમા તિમિઃ ।
તિમેર્યાદોગણા આસન્ શ્વાપદાઃ સરમાસુતાઃ ॥ ૨૬॥

સુરભેર્મહિષા ગાવો યે ચાન્યે દ્વિશફા નૃપ ।
તામ્રાયાઃ શ્યેનગૃધ્રાદ્યા મુનેરપ્સરસાં ગણાઃ ॥ ૨૭॥

દન્દશૂકાદયઃ સર્પા રાજન્ ક્રોધવશાત્મજાઃ ।
ઇલાયા ભૂરુહાઃ સર્વે યાતુધાનાશ્ચ સૌરસાઃ ॥ ૨૮॥

અરિષ્ટાયાશ્ચ ગન્ધર્વાઃ કાષ્ઠાયા દ્વિશફેતરાઃ ।
સુતા દનોરેકષષ્ટિસ્તેષાં પ્રાધાનિકાઞ્છૃણુ ॥ ૨૯॥

દ્વિમૂર્ધા શમ્બરોઽરિષ્ટો હયગ્રીવો વિભાવસુઃ ।
અયોમુખઃ શઙ્કુશિરાઃ સ્વર્ભાનુઃ કપિલોઽરુણઃ ॥ ૩૦॥

પુલોમા વૃષપર્વા ચ એકચક્રોઽનુતાપનઃ ।
ધૂમ્રકેશો વિરૂપાક્ષો વિપ્રચિત્તિશ્ચ દુર્જયઃ ॥ ૩૧॥

સ્વર્ભાનોઃ સુપ્રભાં કન્યામુવાહ નમુચિઃ કિલ ।
વૃષપર્વણસ્તુ શર્મિષ્ઠાં યયાતિર્નાહુષો બલી ॥ ૩૨॥

વૈશ્વાનરસુતા યાશ્ચ ચતસ્રશ્ચારુદર્શનાઃ ।
ઉપદાનવી હયશિરા પુલોમા કાલકા તથા ॥ ૩૩॥

ઉપદાનવીં હિરણ્યાક્ષઃ ક્રતુર્હયશિરાં નૃપ ।
પુલોમાં કાલકાં ચ દ્વે વૈશ્વાનરસુતે તુ કઃ ॥ ૩૪॥

ઉપયેમેઽથ ભગવાન્ કશ્યપો બ્રહ્મચોદિતઃ ।
પૌલોમાઃ કાલકેયાશ્ચ દાનવા યુદ્ધશાલિનઃ ॥ ૩૫॥

તયોઃ ષષ્ટિસહસ્રાણિ યજ્ઞઘ્નાંસ્તે પિતુઃ પિતા ।
જઘાન સ્વર્ગતો રાજન્નેક ઇન્દ્રપ્રિયઙ્કરઃ ॥ ૩૬॥

વિપ્રચિત્તિઃ સિંહિકાયાં શતં ચૈકમજીજનત્ ।
રાહુજ્યેષ્ઠં કેતુશતં ગ્રહત્વં ય ઉપાગતઃ ॥ ૩૭॥

અથાતઃ શ્રૂયતાં વંશો યોઽદિતેરનુપૂર્વશઃ ।

યત્ર નારાયણો દેવઃ સ્વાંશેનાવાતરદ્વિભુઃ ॥ ૩૮॥

વિવસ્વાનર્યમા પૂષા ત્વષ્ટાથ સવિતા ભગઃ ।
ધાતા વિધાતા વરુણો મિત્રઃ શક્ર ઉરુક્રમઃ ॥ ૩૯॥

વિવસ્વતઃ શ્રાદ્ધદેવં સંજ્ઞાસૂયત વૈ મનુમ્ ।
મિથુનં ચ મહાભાગા યમં દેવં યમીં તથા ।
સૈવ ભૂત્વાથ બડવા નાસત્યૌ સુષુવે ભુવિ ॥ ૪૦॥

છાયા શનૈશ્ચરં લેભે સાવર્ણિં ચ મનું તતઃ ।
કન્યાં ચ તપતીં યા વૈ વવ્રે સંવરણં પતિમ્ ॥ ૪૧॥

અર્યમ્ણો માતૃકા પત્ની તયોશ્ચર્ષણયઃ સુતાઃ ।
યત્ર વૈ માનુષી જાતિર્બ્રહ્મણા ચોપકલ્પિતા ॥ ૪૨॥

પૂષાનપત્યઃ પિષ્ટાદો ભગ્નદન્તોઽભવત્પુરા ।
યોઽસૌ દક્ષાય કુપિતં જહાસ વિવૃતદ્વિજઃ ॥ ૪૩॥

ત્વષ્ટુર્દૈત્યાનુજા ભાર્યા રચના નામ કન્યકા ।
સન્નિવેશસ્તયોર્જજ્ઞે વિશ્વરૂપશ્ચ વીર્યવાન્ ॥ ૪૪॥

તં વવ્રિરે સુરગણા સ્વસ્રીયં દ્વિષતામપિ ।
વિમતેન પરિત્યક્તા ગુરુણાઙ્ગિરસેન યત્ ॥ ૪૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ સપ્તમોઽધ્યાયઃ - ૭ ॥

રાજોવાચ
કસ્ય હેતોઃ પરિત્યક્તા આચાર્યેણાત્મનઃ સુરાઃ ।
એતદાચક્ષ્વ ભગવઞ્છિષ્યાણામક્રમં ગુરૌ ॥ ૧॥

શ્રીશુક ઉવાચ
ઇન્દ્રસ્ત્રિભુવનૈશ્વર્યમદોલ્લઙ્ઘિતસત્પથઃ ।

મરુદ્ભિર્વસુભી રુદ્રૈરાદિત્યૈરૃભુભિર્નૃપ ॥ ૨॥

વિશ્વેદેવૈશ્ચ સાધ્યૈશ્ચ નાસત્યાભ્યાં પરિશ્રિતઃ ।
સિદ્ધચારણગન્ધર્વૈર્મુનિભિર્બ્રહ્મવાદિભિઃ ॥ ૩॥

વિદ્યાધરાપ્સરોભિશ્ચ કિન્નરૈઃ પતગોરગૈઃ ।
નિષેવ્યમાણો મઘવાન્ સ્તૂયમાનશ્ચ ભારત ॥ ૪॥

ઉપગીયમાનો લલિતમાસ્થાનાધ્યાસનાશ્રિતઃ ।
પાણ્ડુરેણાતપત્રેણ ચન્દ્રમણ્ડલચારુણા ॥ ૫॥

યુક્તશ્ચાન્યૈઃ પારમેષ્ઠ્યૈશ્ચામરવ્યજનાદિભિઃ ।
વિરાજમાનઃ પૌલોમ્યા સહાર્ધાસનયા ભૃશમ્ ॥ ૬॥

સ યદા પરમાચાર્યં દેવાનામાત્મનશ્ચ હ ।
નાભ્યનન્દત સમ્પ્રાપ્તં પ્રત્યુત્થાનાસનાદિભિઃ ॥ ૭॥

વાચસ્પતિં મુનિવરં સુરાસુરનમસ્કૃતમ્ ।
નોચ્ચચાલાસનાદિન્દ્રઃ પશ્યન્નપિ સભાગતમ્ ॥ ૮॥

તતો નિર્ગત્ય સહસા કવિરાઙ્ગિરસઃ પ્રભુઃ ।
આયયૌ સ્વગૃહં તૂષ્ણીં વિદ્વાન્ શ્રીમદવિક્રિયામ્ ॥ ૯॥

તર્હ્યેવ પ્રતિબુધ્યેન્દ્રો ગુરુહેલનમાત્મનઃ ।
ગર્હયામાસ સદસિ સ્વયમાત્માનમાત્મના ॥ ૧૦॥

અહો બત મયાસાધુ કૃતં વૈ દભ્રબુદ્ધિના ।
યન્મયૈશ્વર્યમત્તેન ગુરુઃ સદસિ કાત્કૃતઃ ॥ ૧૧॥

કો ગૃધ્યેત્પણ્ડિતો લક્ષ્મીં ત્રિવિષ્ટપપતેરપિ ।
યયાહમાસુરં ભાવં નીતોઽદ્ય વિબુધેશ્વરઃ ॥ ૧૨॥

યે પારમેષ્ઠ્યં ધિષણમધિતિષ્ઠન્ન કઞ્ચન ।
પ્રત્યુત્તિષ્ઠેદિતિ બ્રૂયુર્ધર્મં તે ન પરં વિદુઃ ॥ ૧૩॥

તેષાં કુપથદેષ્ટૄણાં પતતાં તમસિ હ્યધઃ ।
યે શ્રદ્દધ્યુર્વચસ્તે વૈ મજ્જન્ત્યશ્મપ્લવા ઇવ ॥ ૧૪॥

અથાહમમરાચાર્યમગાધધિષણં દ્વિજમ્ ।
પ્રસાદયિષ્યે નિશઠઃ શીર્ષ્ણા તચ્ચરણં સ્પૃશન્ ॥ ૧૫॥

એવં ચિન્તયતસ્તસ્ય મઘોનો ભગવાન્ ગૃહાત્ ।
બૃહસ્પતિર્ગતોઽદૃષ્ટાં ગતિમધ્યાત્મમાયયા ॥ ૧૬॥

ગુરોર્નાધિગતઃ સંજ્ઞાં પરીક્ષન્ ભગવાન્ સ્વરાટ્ ।
ધ્યાયન્ ધિયા સુરૈર્યુક્તઃ શર્મ નાલભતાત્મનઃ ॥ ૧૭॥

તચ્છ્રુત્વૈવાસુરાઃ સર્વ આશ્રિત્યૌશનસં મતમ્ ।
દેવાન્ પ્રત્યુદ્યમં ચક્રુર્દુર્મદા આતતાયિનઃ ॥ ૧૮॥

તૈર્વિસૃષ્ટેષુભિસ્તીક્ષ્ણૈર્નિર્ભિન્નાઙ્ગોરુબાહવઃ ।
બ્રહ્માણં શરણં જગ્મુઃ સહેન્દ્રા નતકન્ધરાઃ ॥ ૧૯॥

તાંસ્તથાભ્યર્દિતાન્ વીક્ષ્ય ભગવાનાત્મભૂરજઃ ।
કૃપયા પરયા દેવ ઉવાચ પરિસાન્ત્વયન્ ॥ ૨૦॥

બ્રહ્મોવાચ
અહો બત સુરશ્રેષ્ઠા હ્યભદ્રં વઃ કૃતં મહત્ ।
બ્રહ્મિષ્ઠં બ્રાહ્મણં દાન્તમૈશ્વર્યાન્નાભ્યનન્દત ॥ ૨૧॥

તસ્યાયમનયસ્યાસીત્પરેભ્યો વઃ પરાભવઃ ।
પ્રક્ષીણેભ્યઃ સ્વવૈરિભ્યઃ સમૃદ્ધાનાં ચ યત્સુરાઃ ॥ ૨૨॥

મઘવન્ દ્વિષતઃ પશ્ય પ્રક્ષીણાન્ ગુર્વતિક્રમાત્ ।
સમ્પ્રત્યુપચિતાન્ ભૂયઃ કાવ્યમારાધ્ય ભક્તિતઃ ।
આદદીરન્ નિલયનં મમાપિ ભૃગુદેવતાઃ ॥ ૨૩॥

ત્રિવિષ્ટપં કિં ગણયન્ત્યભેદ્ય-
મન્ત્રા ભૃગૂણામનુશિક્ષિતાર્થાઃ ।
ન વિપ્રગોવિન્દગવીશ્વરાણાં
ભવન્ત્યભદ્રાણિ નરેશ્વરાણામ્ ॥ ૨૪॥

તદ્વિશ્વરૂપં ભજતાશુ વિપ્રં
તપસ્વિનં ત્વાષ્ટ્રમથાત્મવન્તમ્ ।
સભાજિતોઽર્થાન્ સ વિધાસ્યતે વો
યદિ ક્ષમિષ્યધ્વમુતાસ્ય કર્મ ॥ ૨૫॥

શ્રીશુક ઉવાચ
ત એવમુદિતા રાજન્ બ્રહ્મણા વિગતજ્વરાઃ ।
ઋષિં ત્વાષ્ટ્રમુપવ્રજ્ય પરિષ્વજ્યેદમબ્રુવન્ ॥ ૨૬॥

દેવા ઊચુઃ
વયં તેઽતિથયઃ પ્રાપ્તા આશ્રમં ભદ્રમસ્તુ તે ।
કામઃ સમ્પાદ્યતાં તાત પિતૄણાં સમયોચિતઃ ॥ ૨૭॥

પુત્રાણાં હિ પરો ધર્મઃ પિતૃશુશ્રૂષણં સતામ્ ।
અપિ પુત્રવતાં બ્રહ્મન્ કિમુત બ્રહ્મચારિણામ્ ॥ ૨૮॥

આચાર્યો બ્રહ્મણો મૂર્તિઃ પિતા મૂર્તિઃ પ્રજાપતેઃ ।
ભ્રાતા મરુત્પતેર્મૂર્તિર્માતા સાક્ષાત્ક્ષિતેસ્તનુઃ ॥ ૨૯॥

દયાયા ભગિની મૂર્તિર્ધર્મસ્યાત્માતિથિઃ સ્વયમ્ ।
અગ્નેરભ્યાગતો મૂર્તિઃ સર્વભૂતાનિ ચાત્મનઃ ॥ ૩૦॥

તસ્માત્પિતૄણામાર્તાનામાર્તિં પરપરાભવમ્ ।
તપસાપનયંસ્તાત સન્દેશં કર્તુમર્હસિ ॥ ૩૧॥

વૃણીમહે ત્વોપાધ્યાયં બ્રહ્મિષ્ઠં બ્રાહ્મણં ગુરુમ્ ।
યથાઞ્જસા વિજેષ્યામઃ સપત્નાંસ્તવ તેજસા ॥ ૩૨॥

ન ગર્હયન્તિ હ્યર્થેષુ યવિષ્ઠાઙ્ઘ્ર્યભિવાદનમ્ ।
છન્દોભ્યોઽન્યત્ર ન બ્રહ્મન્ વયો જ્યૈષ્ઠ્યસ્ય કારણમ્ ॥ ૩૩॥

ઋષિરુવાચ
અભ્યર્થિતઃ સુરગણૈઃ પૌરોહિત્યે મહાતપાઃ ।
સ વિશ્વરૂપસ્તાનાહ પ્રસન્નઃ શ્લક્ષ્ણયા ગિરા ॥ ૩૪॥

વિશ્વરૂપ ઉવાચ
વિગર્હિતં ધર્મશીલૈર્બ્રહ્મવર્ચ ઉપવ્યયમ્ ।
કથં નુ મદ્વિધો નાથા લોકેશૈરભિયાચિતમ્ ।
પ્રત્યાખ્યાસ્યતિ તચ્છિષ્યઃ સ એવ સ્વાર્થ ઉચ્યતે ॥ ૩૫॥

અકિઞ્ચનાનાં હિ ધનં શિલોઞ્છનં
તેનેહ નિર્વર્તિતસાધુસત્ક્રિયઃ ।
કથં વિગર્હ્યં નુ કરોમ્યધીશ્વરાઃ
પૌરોધસં હૃષ્યતિ યેન દુર્મતિઃ ॥ ૩૬॥

તથાપિ ન પ્રતિબ્રૂયાં ગુરુભિઃ પ્રાર્થિતં કિયત્ ।
ભવતાં પ્રાર્થિતં સર્વં પ્રાણૈરર્થૈશ્ચ સાધયે ॥ ૩૭॥

શ્રીશુક ઉવાચ
તેભ્ય એવં પ્રતિશ્રુત્ય વિશ્વરૂપો મહાતપાઃ ।
પૌરોહિત્યં વૃતશ્ચક્રે પરમેણ સમાધિના ॥ ૩૮॥

સુરદ્વિષાં શ્રિયં ગુપ્તામૌશનસ્યાપિ વિદ્યયા ।
આચ્છિદ્યાદાન્મહેન્દ્રાય વૈષ્ણવ્યા વિદ્યયા વિભુઃ ॥ ૩૯॥

યયા ગુપ્તઃ સહસ્રાક્ષો જિગ્યેઽસુરચમૂર્વિભુઃ ।
તાં પ્રાહ સ મહેન્દ્રાય વિશ્વરૂપ ઉદારધીઃ ॥ ૪૦॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે સપ્તમોઽધ્યાયઃ ॥ ૭॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ અષ્ટમોઽધ્યાયઃ - ૮ ॥

રાજોવાચ
યયા ગુપ્તઃ સહસ્રાક્ષઃ સવાહાન્ રિપુસૈનિકાન્ ।
ક્રીડન્નિવ વિનિર્જિત્ય ત્રિલોક્યા બુભુજે શ્રિયમ્ ॥ ૧॥

ભગવંસ્તન્મમાખ્યાહિ વર્મ નારાયણાત્મકમ્ ।
યથાઽઽતતાયિનઃ શત્રૂન્ યેન ગુપ્તોઽજયન્મૃધે ॥ ૨॥

શ્રીશુક ઉવાચ
વૃતઃ પુરોહિતસ્ત્વાષ્ટ્રો મહેન્દ્રાયાનુપૃચ્છતે ।
નારાયણાખ્યં વર્માહ તદિહૈકમનાઃ શ઼ૃણુ ॥ ૩॥

વિશ્વરૂપ ઉવાચ
ધૌતાઙ્ઘ્રિપાણિરાચમ્ય સપવિત્ર ઉદઙ્મુખઃ ।
કૃતસ્વાઙ્ગકરન્યાસો મન્ત્રાભ્યાં વાગ્યતઃ શુચિઃ ॥ ૪॥

નારાયણમયં વર્મ સન્નહ્યેદ્ભય આગતે ।
પાદયોર્જાનુનોરૂર્વોરુદરે હૃદ્યથોરસિ ॥ ૫॥

મુખે શિરસ્યાનુપૂર્વ્યાદોઙ્કારાદીનિ વિન્યસેત્ ।
ઓં નમો નારાયણાયેતિ વિપર્યયમથાપિ વા ॥ ૬॥

કરન્યાસં તતઃ કુર્યાદ્દ્વાદશાક્ષરવિદ્યયા ।
પ્રણવાદિયકારાન્તમઙ્ગુલ્યઙ્ગુષ્ઠપર્વસુ ॥ ૭॥

ન્યસેદ્ધૃદય ઓઙ્કારં વિકારમનુ મૂર્ધનિ ।
ષકારં તુ ભ્રુવોર્મધ્યે ણકારં શિખયા દિશેત્ ॥ ૮॥

વેકારં નેત્રયોર્યુઞ્જ્યાન્નકારં સર્વસન્ધિષુ ।
મકારમસ્ત્રમુદ્દિશ્ય મન્ત્રમૂર્તિર્ભવેદ્બુધઃ ॥ ૯॥

સવિસર્ગં ફડન્તં તત્સર્વદિક્ષુ વિનિર્દિશેત્ ।
ઓં વિષ્ણવે નમ ઇતિ ॥ ૧૦॥

આત્માનં પરમં ધ્યાયેદ્ધ્યેયં ષટ્ શક્તિભિર્યુતમ્ ।
વિદ્યાતેજસ્તપોમૂર્તિમિમં મન્ત્રમુદાહરેત્ ॥ ૧૧॥

ઓં હરિર્વિદધ્યાન્મમ સર્વરક્ષાં
ન્યસ્તાઙ્ઘ્રિપદ્મઃ પતગેન્દ્રપૃષ્ઠે ।
દરારિચર્માસિગદેષુચાપ-
પાશાન્ દધાનોઽષ્ટગુણોઽષ્ટબાહુઃ ॥ ૧૨॥

જલેષુ માં રક્ષતુ મત્સ્યમૂર્તિ-
ર્યાદોગણેભ્યો વરુણસ્ય પાશાત્ ।
સ્થલેષુ માયાવટુવામનોઽવ્યા-
ત્રિવિક્રમઃ ખેઽવતુ વિશ્વરૂપઃ ॥ ૧૩॥

દુર્ગેષ્વટવ્યાજિમુખાદિષુ પ્રભુઃ
પાયાન્નૃસિંહોઽસુરયૂથપારિઃ ।
વિમુઞ્ચતો યસ્ય મહાટ્ટહાસં
દિશો વિનેદુર્ન્યપતંશ્ચ ગર્ભાઃ ॥ ૧૪॥

રક્ષત્વસૌ માધ્વનિ યજ્ઞકલ્પઃ
સ્વદંષ્ટ્રયોન્નીતધરો વરાહઃ ।
રામોઽદ્રિકૂટેષ્વથ વિપ્રવાસે
સલક્ષ્મણોઽવ્યાદ્ભરતાગ્રજોઽસ્માન્ ॥ ૧૫॥

મામુગ્રધર્માદખિલાત્પ્રમાદા-

ન્નારાયણઃ પાતુ નરશ્ચ હાસાત્ ।
દત્તસ્ત્વયોગાદથ યોગનાથઃ
પાયાદ્ગુણેશઃ કપિલઃ કર્મબન્ધાત્ ॥ ૧૬॥

સનત્કુમારોઽવતુ કામદેવા-
દ્ધયશીર્ષા માં પથિ દેવહેલનાત્ ।
દેવર્ષિવર્યઃ પુરુષાર્ચનાન્તરા-
ત્કૂર્મો હરિર્માં નિરયાદશેષાત્ ॥ ૧૭॥

ધન્વન્તરિર્ભગવાન્ પાત્વપથ્યા-
દ્દ્વન્દ્વાદ્ભયાદૃષભો નિર્જિતાત્મા ।
યજ્ઞશ્ચ લોકાદવતાજ્જનાન્તા-
દ્બલો ગણાત્ક્રોધવશાદહીન્દ્રઃ ॥ ૧૮॥

દ્વૈપાયનો ભગવાનપ્રબોધા-
દ્બુદ્ધસ્તુ પાખણ્ડગણપ્રમાદાત્ ।
કલ્કિઃ કલેઃ કાલમલાત્પ્રપાતુ
ધર્માવનાયોરુકૃતાવતારઃ ॥ ૧૯॥

માં કેશવો ગદયા પ્રાતરવ્યા-
દ્ગોવિન્દ આસઙ્ગવમાત્તવેણુઃ ।
નારાયણઃ પ્રાહ્ણ ઉદાત્તશક્તિ-
ર્મધ્યન્દિને વિષ્ણુરરીન્દ્રપાણિઃ ॥ ૨૦॥

દેવોઽપરાહ્ણે મધુહોગ્રધન્વા
સાયં ત્રિધામાવતુ માધવો મામ્ ।
દોષે હૃષીકેશ ઉતાર્ધરાત્રે
નિશીથ એકોઽવતુ પદ્મનાભઃ ॥ ૨૧॥

શ્રીવત્સધામાપરરાત્ર ઈશઃ
પ્રત્યૂષ ઈશોઽસિધરો જનાર્દનઃ ।
દામોદરોઽવ્યાદનુસન્ધ્યં પ્રભાતે
વિશ્વેશ્વરો ભગવાન્ કાલમૂર્તિઃ ॥ ૨૨॥

ચક્રં યુગાન્તાનલતિગ્મનેમિ
ભ્રમત્સમન્તાદ્ભગવત્પ્રયુક્તમ્ ।
દન્દગ્ધિ દન્દગ્ધ્યરિસૈન્યમાશુ

કક્ષં યથા વાતસખો હુતાશઃ ॥ ૨૩॥

ગદેઽશનિસ્પર્શનવિસ્ફુલિઙ્ગે
નિષ્પિણ્ઢિ નિષ્પિણ્ઢ્યજિતપ્રિયાસિ ।
કૂષ્માણ્ડવૈનાયકયક્ષરક્ષો-
ભૂતગ્રહાંશ્ચૂર્ણય ચૂર્ણયારીન્ ॥ ૨૪॥

ત્વં યાતુધાનપ્રમથપ્રેતમાતૃ-
પિશાચવિપ્રગ્રહઘોરદૃષ્ટીન્ ।
દરેન્દ્ર વિદ્રાવય કૃષ્ણપૂરિતો
ભીમસ્વનોઽરેર્હૃદયાનિ કમ્પયન્ ॥ ૨૫॥

ત્વં તિગ્મધારાસિવરારિસૈન્ય-
મીશપ્રયુક્તો મમ છિન્ધિ છિન્ધિ ।
ચક્ષૂંષિ ચર્મઞ્છતચન્દ્ર છાદય
દ્વિષામઘોનાં હર પાપચક્ષુષામ્ ॥ ૨૬॥

યન્નો ભયં ગ્રહેભ્યોઽભૂત્કેતુભ્યો નૃભ્ય એવ ચ ।
સરીસૃપેભ્યો દંષ્ટ્રિભ્યો ભૂતેભ્યોંઽહોભ્ય એવ વા ॥ ૨૭॥

સર્વાણ્યેતાનિ ભગવન્ નામરૂપાસ્ત્રકીર્તનાત્ ।
પ્રયાન્તુ સઙ્ક્ષયં સદ્યો યે નઃ શ્રેયઃપ્રતીપકાઃ ॥ ૨૮॥

ગરુડો ભગવાન્ સ્તોત્રસ્તોભશ્છન્દોમયઃ પ્રભુઃ ।
રક્ષત્વશેષકૃચ્છ્રેભ્યો વિષ્વક્સેનઃ સ્વનામભિઃ ॥ ૨૯॥

સર્વાપદ્ભ્યો હરેર્નામરૂપયાનાયુધાનિ નઃ ।
બુદ્ધીન્દ્રિયમનઃપ્રાણાન્ પાન્તુ પાર્ષદભૂષણાઃ ॥ ૩૦॥

યથા હિ ભગવાનેવ વસ્તુતઃ સદસચ્ચ યત્ ।
સત્યેનાનેન નઃ સર્વે યાન્તુ નાશમુપદ્રવાઃ ॥ ૩૧॥

યથૈકાત્મ્યાનુભાવાનાં વિકલ્પરહિતઃ સ્વયમ્ ।
ભૂષણાયુધલિઙ્ગાખ્યા ધત્તે શક્તીઃ સ્વમાયયા ॥ ૩૨॥

તેનૈવ સત્યમાનેન સર્વજ્ઞો ભગવાન્ હરિઃ ।
પાતુ સર્વૈઃ સ્વરૂપૈર્નઃ સદા સર્વત્ર સર્વગઃ ॥ ૩૩॥

વિદિક્ષુ દિક્ષૂર્ધ્વમધઃ સમન્તા-

દન્તબર્હિર્ભગવાન્ નારસિંહઃ ।
પ્રહાપયઁલ્લોકભયં સ્વનેન
સ્વતેજસા ગ્રસ્તસમસ્તતેજાઃ ॥ ૩૪॥

મઘવન્નિદમાખ્યાતં વર્મ નારાયણાત્મકમ્ ।
વિજેષ્યસ્યઞ્જસા યેન દંશિતોઽસુરયૂથપાન્ ॥ ૩૫॥

એતદ્ધારયમાણસ્તુ યં યં પશ્યતિ ચક્ષુષા ।
પદા વા સંસ્પૃશેત્સદ્યઃ સાધ્વસાત્સ વિમુચ્યતે ॥ ૩૬॥

ન કુતશ્ચિદ્ભયં તસ્ય વિદ્યાં ધારયતો ભવેત્ ।
રાજદસ્યુગ્રહાદિભ્યો વ્યાધ્યાદિભ્યશ્ચ કર્હિચિત્ ॥ ૩૭॥

ઇમાં વિદ્યાં પુરા કશ્ચિત્કૌશિકો ધારયન્ દ્વિજઃ ।
યોગધારણયા સ્વાઙ્ગં જહૌ સ મરુધન્વનિ ॥ ૩૮॥

તસ્યોપરિ વિમાનેન ગન્ધર્વપતિરેકદા ।
યયૌ ચિત્રરથઃ સ્ત્રીભિર્વૃતો યત્ર દ્વિજક્ષયઃ ॥ ૩૯॥

ગગનાન્ન્યપતત્સદ્યઃ સવિમાનો હ્યવાક્શિરાઃ ।
સ વાલખિલ્યવચનાદસ્થીન્યાદાય વિસ્મિતઃ ।
પ્રાસ્ય પ્રાચીસરસ્વત્યાં સ્નાત્વા ધામ સ્વમન્વગાત્ ॥ ૪૦॥

શ્રીશુક ઉવાચ
ય ઇદં શૃણુયાત્કાલે યો ધારયતિ ચાદૃતઃ ।
તં નમસ્યન્તિ ભૂતાનિ મુચ્યતે સર્વતો ભયાત્ ॥ ૪૧॥

એતાં વિદ્યામધિગતો વિશ્વરૂપાચ્છતક્રતુઃ ।
ત્રૈલોક્યલક્ષ્મીં બુભુજે વિનિર્જિત્ય મૃધેઽસુરાન્ ॥ ૪૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે નારાયણવર્મકથનં નામાષ્ટમોઽધ્યાયઃ ॥ ૮॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ નવમોऽધ્યાયઃ - ૯ ॥

શ્રીશુક ઉવાચ
તસ્યાસન્ વિશ્વરૂપસ્ય શિરાંસિ ત્રીણિ ભારત ।
સોમપીથં સુરાપીથમન્નાદમિતિ શુશ્રુમ ॥ ૧॥

સ વૈ બર્હિષિ દેવેભ્યો ભાગં પ્રત્યક્ષમુચ્ચકૈઃ ।
અદદદ્યસ્ય પિતરો દેવાઃ સપ્રશ્રયં નૃપ ॥ ૨॥

સ એવ હિ દદૌ ભાગં પરોક્ષમસુરાન્ પ્રતિ ।
યજમાનોऽવહદ્ભાગં માતૃસ્નેહવશાનુગઃ ॥ ૩॥

તદ્દેવહેલનં તસ્ય ધર્માલીકં સુરેશ્વરઃ ।
આલક્ષ્ય તરસા ભીતસ્તચ્છીર્ષાણ્યચ્છિનદ્રુષા ॥ ૪॥

સોમપીથં તુ યત્તસ્ય શિર આસીત્કપિઞ્જલઃ ।
કલવિઙ્કઃ સુરાપીથમન્નાદં યત્સ તિત્તિરિઃ ॥ ૫॥

બ્રહ્મહત્યામઞ્જલિના જગ્રાહ યદપીશ્વરઃ ।
સંવત્સરાન્તે તદઘં ભૂતાનાં સ વિશુદ્ધયે ॥ ૬॥

ભૂમ્યમ્બુદ્રુમયોષિદ્ભ્યશ્ચતુર્ધા વ્યભજદ્ધરિઃ ।
ભૂમિસ્તુરીયં જગ્રાહ ખાતપૂરવરેણ વૈ ॥ ૭॥

ઈરિણં બ્રહ્મહત્યાયા રૂપં ભૂમૌ પ્રદૃશ્યતે ।
તુર્યં છેદવિરોહેણ વરેણ જગૃહુર્દ્રુમાઃ ॥ ૮॥

તેષાં નિર્યાસરૂપેણ બ્રહ્મહત્યા પ્રદૃશ્યતે ।
શશ્વત્કામવરેણાંહસ્તુરીયં જગૃહુઃ સ્ત્રિયઃ ॥ ૯॥

રજોરૂપેણ તાસ્વંહો માસિ માસિ પ્રદૃશ્યતે ।
દ્રવ્યભૂયોવરેણાપસ્તુરીયં જગૃહુર્મલમ્ ॥ ૧૦॥

તાસુ બુદ્બુદફેનાભ્યાં દૃષ્ટં તદ્ધરતિ ક્ષિપન્ ।
હતપુત્રસ્તતસ્ત્વષ્ટા જુહાવેન્દ્રાય શત્રવે ॥ ૧૧॥

ઇન્દ્રશત્રો વિવર્ધસ્વ મા ચિરં જહિ વિદ્વિષમ્ ।
અથાન્વાહાર્યપચનાદુત્થિતો ઘોરદર્શનઃ ॥ ૧૨॥

કૃતાન્ત ઇવ લોકાનાં યુગાન્તસમયે યથા ।
વિષ્વગ્વિવર્ધમાનં તમિષુમાત્રં દિને દિને ॥ ૧૩॥

દગ્ધશૈલપ્રતીકાશં સન્ધ્યાભ્રાનીકવર્ચસમ્ ।
તપ્તતામ્રશિખાશ્મશ્રું મધ્યાહ્નાર્કોગ્રલોચનમ્ ॥ ૧૪॥

દેદીપ્યમાને ત્રિશિખે શૂલ આરોપ્ય રોદસી ।
નૃત્યન્તમુન્નદન્તં ચ ચાલયન્તં પદા મહીમ્ ॥ ૧૫॥

દરીગમ્ભીરવક્ત્રેણ પિબતા ચ નભસ્તલમ્ ।
લિહતા જિહ્વયર્ક્ષાણિ ગ્રસતા ભુવનત્રયમ્ ॥ ૧૬॥

મહતા રૌદ્રદંષ્ટ્રેણ જૃમ્ભમાણં મુહુર્મુહુઃ ।
વિત્રસ્તા દુદ્રુવુર્લોકા વીક્ષ્ય સર્વે દિશો દશ ॥ ૧૭॥

યેનાવૃતા ઇમે લોકાસ્તમસા ત્વાષ્ટ્રમૂર્તિના ।
સ વૈ વૃત્ર ઇતિ પ્રોક્તઃ પાપઃ પરમદારુણઃ ॥ ૧૮॥

તં નિજઘ્નુરભિદ્રુત્ય સગણા વિબુધર્ષભાઃ ।
સ્વૈઃ સ્વૈર્દિવ્યાસ્ત્રશસ્ત્રૌઘૈઃ સોઽગ્રસત્તાનિ કૃત્સ્નશઃ ॥ ૧૯॥

તતસ્તે વિસ્મિતાઃ સર્વે વિષણ્ણા ગ્રસ્તતેજસઃ ।
પ્રત્યગ્ચમાદિપુરુષમુપતસ્થુઃ સમાહિતાઃ ॥ ૨૦॥

દેવા ઊચુઃ
વાય્વમ્બરાગ્ન્યપ્ક્ષિતયસ્ત્રિલોકા
બ્રહ્માદયો યે વયમુદ્વિજન્તઃ ।
હરામ યસ્મૈ બલિમન્તકોઽસૌ
બિભેતિ યસ્માદરણં તતો નઃ ॥ ૨૧॥

અવિસ્મિતં તં પરિપૂર્ણકામં
સ્વેનૈવ લાભેન સમં પ્રશાન્તમ્ ।
વિનોપસર્પત્યપરં હિ બાલિશઃ
શ્વલાઙ્ગુલેનાતિતિતર્તિ સિન્ધુમ્ ॥ ૨૨॥

યસ્યોરુશૃઙ્ગે જગતીં સ્વનાવં
મનુર્યથાઽઽબધ્ય તતાર દુર્ગમ્ ।
સ એવ નસ્ત્વાષ્ટ્રભયાદ્દુરન્તા-
ત્ત્રાતાઽઽશ્રિતાન્ વારિચરોઽપિ નૂનમ્ ॥ ૨૩॥

પુરા સ્વયમ્ભૂરપિ સંયમામ્ભ-

સ્યુદીર્ણવાતોર્મિરવૈઃ કરાલે ।
એકોઽરવિન્દાત્પતિતસ્તતાર
તસ્માદ્ભયાદ્યેન સ નોઽસ્તુ પારઃ ॥ ૨૪॥

ય એક ઈશો નિજમાયયા નઃ
સસર્જ યેનાનુસૃજામ વિશ્વમ્ ।
વયં ન યસ્યાપિ પુરઃ સમીહતઃ
પશ્યામ લિઙ્ગં પૃથગીશમાનિનઃ ॥ ૨૫॥

યો નઃ સપત્નૈર્ભૃશમર્દ્યમાનાન્
દેવર્ષિતિર્યઙ્નૃષુ નિત્ય એવ ।
કૃતાવતારસ્તનુભિઃ સ્વમાયયા
કૃત્વાઽઽત્મસાત્પાતિ યુગે યુગે ચ ॥ ૨૬॥

તમેવ દેવં વયમાત્મદૈવતં
પરં પ્રધાનં પુરુષં વિશ્વમન્યમ્ ।
વ્રજામ સર્વે શરણં શરણ્યં
સ્વાનાં સ નો ધાસ્યતિ શં મહાત્મા ॥ ૨૭॥

શ્રીશુક ઉવાચ
ઇતિ તેષાં મહારાજ સુરાણામુપતિષ્ઠતામ્ ।
પ્રતીચ્યાં દિશ્યભૂદાવિઃ શઙ્ખચક્રગદાધરઃ ॥ ૨૮॥

આત્મતુલ્યૈઃ ષોડશભિર્વિના શ્રીવત્સકૌસ્તુભૌ ।
પર્યુપાસિતમુન્નિદ્રશરદમ્બુરુહેક્ષણમ્ ॥ ૨૯॥

દૃષ્ટ્વા તમવનૌ સર્વ ઈક્ષણાહ્લાદવિક્લવાઃ ।
દણ્ડવત્પતિતા રાજઞ્છનૈરુત્થાય તુષ્ટુવુઃ ॥ ૩૦॥

દેવા ઊચુઃ
નમસ્તે યજ્ઞવીર્યાય વયસે ઉત તે નમઃ ।
નમસ્તે હ્યસ્તચક્રાય નમઃ સુપુરુહૂતયે ॥ ૩૧॥

યત્તે ગતીનાં તિસૃણામીશિતુઃ પરમં પદમ્ ।
નાર્વાચીનો વિસર્ગસ્ય ધાતર્વેદિતુમર્હતિ ॥ ૩૨॥

ઓં નમસ્તેઽસ્તુ ભગવન્ નારાયણ
વાસુદેવાઽઽદિપુરુષ મહાપુરુષ મહાનુભાવ

પરમમઙ્ગલ પરમકલ્યાણ પરમકારુણિક
કેવલ જગદાધાર લોકૈકનાથ સર્વેશ્વર
લક્ષ્મીનાથ પરમહંસપરિવ્રાજકૈઃ
પરમેણાત્મયોગસમાધિના પરિભાવિત-
પરિસ્ફુટપારમહંસ્યધર્મેણોદ્ઘાટિતતમઃ-
કપાટદ્વારે ચિત્તેઽપાવૃત આત્મલોકે
સ્વયમુપલબ્ધનિજસુખાનુભવો ભવાન્ ॥ ૩૩॥

દુરવબોધ ઇવ તવાયં વિહારયોગો
યદશરણોઽશરીર ઇદમનવેક્ષિતાસ્મ-
ત્સમવાય આત્મનૈવાવિક્રિયમાણેન
સગુણમગુણઃ સૃજસિ પાસિ હરસિ ॥ ૩૪॥

અથ તત્ર ભવાન્ કિં દેવદત્તવદિહ
ગુણવિસર્ગપતિતઃ પારતન્ત્ર્યેણ સ્વકૃત-
કુશલાકુશલં ફલમુપાદદાત્યાહોસ્વિ-
દાત્મારામ ઉપશમશીલઃ સમઞ્જસદર્શન
ઉદાસ્ત ઇતિ હ વાવ ન વિદામઃ ॥ ૩૫॥

ન હિ વિરોધ ઉભયં ભગવત્યપરિમિત-
ગુણગણ ઈશ્વરેઽનવગાહ્યમાહાત્મ્યેઽર્વાચીન-
વિકલ્પવિતર્કવિચારપ્રમાણાભાસકુતર્ક-
શાસ્ત્રકલિલાન્તઃકરણાશ્રયદુરવગ્રહવાદિનાં
વિવાદાનવસર ઉપરતસમસ્તમાયામયે
કેવલ એવાત્મમાયામન્તર્ધાય કો
ન્વર્થો દુર્ઘટ ઇવ ભવતિ સ્વરૂપદ્વયાભાવાત્ ॥ ૩૬॥

સમવિષમમતીનાં મતમનુસરસિ યથા
રજ્જુખણ્ડઃ સર્પાદિધિયામ્ ॥ ૩૭॥

સ એવ હિ પુનઃ સર્વવસ્તુનિ વસ્તુસ્વરૂપઃ
સર્વેશ્વરઃ સકલજગત્કારણકારણભૂતઃ
સર્વપ્રત્યગાત્મત્વાત્સર્વગુણાભાસોપલક્ષિત
એક એવ પર્યવશેષિતઃ ॥ ૩૮॥

અથ હ વાવ તવ મહિમામૃતરસસમુદ્ર-

વિપ્રુષા સકૃદવલીઢયા સ્વમનસિ
નિષ્યન્દમાનાનવરતસુખેન વિસ્મારિત-
દૃષ્ટશ્રુતવિષયસુખલેશાભાસાઃ
પરમભાગવતા એકાન્તિનો ભગવતિ
સર્વભૂતપ્રિયસુહૃદિ સર્વાત્મનિ નિતરાં
નિરન્તરં નિર્વૃતમનસઃ કથમુ હ વા એતે
મધુમથન પુનઃ સ્વાર્થકુશલા હ્યાત્મપ્રિય-
સુહૃદઃ સાધવસ્ત્વચ્ચરણામ્બુજાનુસેવાં
વિસૃજન્તિ ન યત્ર પુનરયં સંસારપર્યાવર્તઃ ॥ ૩૯॥

ત્રિભુવનાત્મભવન ત્રિવિક્રમ ત્રિનયન
ત્રિલોકમનોહરાનુભાવ તવૈવ વિભૂતયો
દિતિજદનુજાદયશ્ચાપિ તેષામનુપક્રમ-
સમયોઽયમિતિ સ્વાત્મમાયયા
સુરનરમૃગમિશ્રિતજલચરાકૃતિભિ-
ર્યથાપરાધં દણ્ડં દણ્ડધર દધર્થ
એવમેનમપિ ભગવન્ જહિ ત્વાષ્ટ્રમુત
યદિ મન્યસે ॥ ૪૦॥

અસ્માકં તાવકાનાં તવ નતાનાં તત
તતામહ તવ ચરણનલિનયુગલધ્યાના-
નુબદ્ધહૃદયનિગડાનાં સ્વલિઙ્ગવિવરણેના-
ત્મસાત્કૃતાનામનુકમ્પાનુરઞ્જિતવિશદ-
રુચિરશિશિરસ્મિતાવલોકેન વિગલિત-
મધુરમુખરસામૃતકલયા ચાન્તસ્તાપ-
મનઘાર્હસિ શમયિતુમ્ ॥ ૪૧॥

અથ ભગવંસ્તવાસ્માભિરખિલજગ-
દુત્પત્તિસ્થિતિલયનિમિત્તાયમાનદિવ્ય-
માયાવિનોદસ્ય સકલજીવનિકાયાના-
મન્તર્હૃદયેષુ બહિરપિ ચ બ્રહ્મપ્રત્યગાત્મ-
સ્વરૂપેણ પ્રધાનરૂપેણ ચ યથાદેશકાલ-
દેહાવસ્થાનવિશેષં તદુપાદાનો-
પલમ્ભકતયાનુભવતઃ સર્વપ્રત્યયસાક્ષિણ

આકાશશરીરસ્ય સાક્ષાત્પરબ્રહ્મણઃ
પરમાત્મનઃ કિયાનિહ વાર્થવિશેષો
વિજ્ઞાપનીયઃ સ્યાદ્વિસ્ફુલિઙ્ગાદિભિરિવ
હિરણ્યરેતસઃ ॥ ૪૨॥

અત એવ સ્વયં તદુપકલ્પયાસ્માકં
ભગવતઃ પરમગુરોસ્તવ ચરણશત-
પલાશચ્છાયાં વિવિધવૃજિનસંસાર-
પરિશ્રમોપશમનીમુપસૃતાનાં વયં
યત્કામેનોપસાદિતાઃ ॥ ૪૩॥

અથો ઈશ જહિ ત્વાષ્ટ્રં ગ્રસન્તં ભુવનત્રયમ્ ।
ગ્રસ્તાનિ યેન નઃ કૃષ્ણ તેજાંસ્યસ્ત્રાયુધાનિ ચ ॥ ૪૪॥

હંસાય દહ્રનિલયાય નિરીક્ષકાય
કૃષ્ણાય મૃષ્ટયશસે નિરુપક્રમાય ।
સત્સઙ્ગ્રહાય ભવપાન્થનિજાશ્રમાપ્ત-
વન્તે પરીષ્ટગતયે હરયે નમસ્તે ॥ ૪૫॥

શ્રીશુક ઉવાચ
અથૈવમીડિતો રાજન્ સાદરં ત્રિદશૈર્હરિઃ ।
સ્વમુપસ્થાનમાકર્ણ્ય પ્રાહ તાનભિનન્દિતઃ ॥ ૪૬॥

શ્રીભગવાનુવાચ
પ્રીતોઽહં વઃ સુરશ્રેષ્ઠા મદુપસ્થાનવિદ્યયા ।
આત્મૈશ્વર્યસ્મૃતિઃ પુંસાં ભક્તિશ્ચૈવ યયા મયિ ॥ ૪૭॥

કિં દુરાપં મયિ પ્રીતે તથાપિ વિબુધર્ષભાઃ ।
મય્યેકાન્તમતિર્નાન્યન્મત્તો વાઞ્છતિ તત્ત્વવિત્ ॥ ૪૮॥

ન વેદ કૃપણઃ શ્રેય આત્મનો ગુણવસ્તુદૃક્ ।
તસ્ય તાનિચ્છતો યચ્છેદ્યદિ સોઽપિ તથાવિધઃ ॥ ૪૯॥

સ્વયં નિઃશ્રેયસં વિદ્વાન્ ન વક્ત્યજ્ઞાય કર્મ હિ ।
ન રાતિ રોગિણોઽપથ્યં વાઞ્છતો હિ ભિષક્તમઃ ॥ ૫૦॥

મઘવન્ યાત ભદ્રં વો દધ્યઞ્ચમૃષિસત્તમમ્ ।
વિદ્યાવ્રતતપઃસારં ગાત્રં યાચત મા ચિરમ્ ॥ ૫૧॥

સ વા અધિગતો દધ્યઙ્ઙશ્વિભ્યાં બ્રહ્મ નિષ્કલમ્ ।
યદ્વા અશ્વશિરો નામ તયોરમરતાં વ્યધાત્ ॥ ૫૨॥

દધ્યઙ્ઙાથર્વણસ્ત્વષ્ટ્રે વર્માભેદ્યં મદાત્મકમ્ ।
વિશ્વરૂપાય યત્પ્રાદાત્ત્વષ્ટા યત્ત્વમધાસ્તતઃ ॥ ૫૩॥

યુષ્મભ્યં યાચિતોઽશ્વિભ્યાં ધર્મજ્ઞોઽઙ્ગાનિ દાસ્યતિ ।
તતસ્તૈરાયુધશ્રેષ્ઠો વિશ્વકર્મવિનિર્મિતઃ ।
યેન વૃત્રશિરો હર્તા મત્તેજ ઉપબૃંહિતઃ ॥ ૫૪॥

તસ્મિન્ વિનિહતે યૂયં તેજોઽસ્ત્રાયુધસમ્પદઃ ।
ભૂયઃ પ્રાપ્સ્યથ ભદ્રં વો ન હિંસન્તિ ચ મત્પરાન્ ॥ ૫૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે નવમોઽધ્યાયઃ ॥ ૯॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દશમોઽધ્યાયઃ - ૧૦ ॥

શ્રીશુક ઉવાચ
ઇન્દ્રમેવં સમાદિશ્ય ભગવાન્ વિશ્વભાવનઃ ।
પશ્યતામનિમેષાણાં તત્રૈવાન્તર્દધે હરિઃ ॥ ૧॥

તથાભિયાચિતો દેવૈરૃષિરાથર્વણો મહાન્ ।
મોદમાન ઉવાચેદં પ્રહસન્નિવ ભારત ॥ ૨॥

અપિ વૃન્દારકા યૂયં ન જાનીથ શરીરિણામ્ ।
સંસ્થાયાં યસ્ત્વભિદ્રોહો દુઃસહશ્ચેતનાપહઃ ॥ ૩॥

જિજીવિષૂણાં જીવાનામાત્મા પ્રેષ્ઠ ઇહેપ્સિતઃ ।
ક ઉત્સહેત તં દાતું ભિક્ષમાણાય વિષ્ણવે ॥ ૪॥

દેવા ઊચુઃ
કિં નુ તદ્દુસ્ત્યજં બ્રહ્મન્ પુંસાં ભૂતાનુકમ્પિનામ્ ।
ભવદ્વિધાનાં મહતાં પુણ્યશ્લોકેડ્યકર્મણામ્ ॥ ૫॥

ન નુ સ્વાર્થપરો લોકો ન વેદ પરસઙ્કટમ્ ।
યદિ વેદ ન યાચેત નેતિ નાહ યદીશ્વરઃ ॥ ૬॥

ઋષિરુવાચ
ધર્મં વઃ શ્રોતુકામેન યૂયં મે પ્રત્યુદાહૃતાઃ ।
એષ વઃ પ્રિયમાત્માનં ત્યજન્તં સન્ત્યજામ્યહમ્ ॥ ૭॥

યોઽધ્રુવેણાત્મના નાથા ન ધર્મં ન યશઃ પુમાન્ ।
ઈહેત ભૂતદયયા સ શોચ્યઃ સ્થાવરૈરપિ ॥ ૮॥

એતાવાનવ્યયો ધર્મઃ પુણ્યશ્લોકૈરુપાસિતઃ ।
યો ભૂતશોકહર્ષાભ્યામાત્મા શોચતિ હૃષ્યતિ ॥ ૯॥

અહો દૈન્યમહો કષ્ટં પારક્યૈઃ ક્ષણભઙ્ગુરૈઃ ।
યન્નોપકુર્યાદસ્વાર્થૈર્મર્ત્યઃ સ્વજ્ઞાતિવિગ્રહૈઃ ॥ ૧૦॥

શ્રીશુક ઉવાચ
એવં કૃતવ્યવસિતો દધ્યઙ્ઙાથર્વણસ્તનુમ્ ।
પરે ભગવતિ બ્રહ્મણ્યાત્માનં સન્નયન્ જહૌ ॥ ૧૧॥

યતાક્ષાસુમનોબુદ્ધિસ્તત્ત્વદૃગ્ ધ્વસ્તબન્ધનઃ ।
આસ્થિતઃ પરમં યોગં ન દેહં બુબુધે ગતમ્ ॥ ૧૨॥

અથેન્દ્રો વજ્રમુદ્યમ્ય નિર્મિતં વિશ્વકર્મણા ।
મુનેઃ શુક્તિભિરુત્સિક્તો ભગવત્તેજસાન્વિતઃ ॥ ૧૩॥

વૃતો દેવગણૈઃ સર્વૈર્ગજેન્દ્રોપર્યશોભત ।
સ્તૂયમાનો મુનિગણૈસ્ત્રૈલોક્યં હર્ષયન્નિવ ॥ ૧૪॥

વૃત્રમભ્યદ્રવચ્છત્રુમસુરાનીકયૂથપૈઃ ।
પર્યસ્તમોજસા રાજન્ ક્રુદ્ધો રુદ્ર ઇવાન્તકમ્ ॥ ૧૫॥

તતઃ સુરાણામસુરૈ રણઃ પરમદારુણઃ ।
ત્રેતામુખે નર્મદાયામભવત્પ્રથમે યુગે ॥ ૧૬॥

રુદ્રૈર્વસુભિરાદિત્યૈરશ્વિભ્યાં પિતૃવહ્નિભિઃ ।
મરુદ્ભિરૃભુભિઃ સાધ્યૈર્વિશ્વેદેવૈર્મરુત્પતિમ્ ॥ ૧૭॥

દૃષ્ટ્વા વજ્રધરં શક્રં રોચમાનં સ્વયા શ્રિયા ।
નામૃષ્યન્નસુરા રાજન્ મૃધે વૃત્રપુરઃસરાઃ ॥ ૧૮॥

નમુચિઃ શમ્બરોઽનર્વા દ્વિમૂર્ધા ઋષભોઽસુરઃ ।
હયગ્રીવઃ શઙ્કુશિરા વિપ્રચિત્તિરયોમુખઃ ॥ ૧૯॥

પુલોમા વૃષપર્વા ચ પ્રહેતિર્હેતિરુત્કલઃ ।
દૈતેયા દાનવા યક્ષા રક્ષાંસિ ચ સહસ્રશઃ ॥ ૨૦॥

સુમાલિમાલિપ્રમુખાઃ કાર્તસ્વરપરિચ્છદાઃ ।
પ્રતિષિધ્યેન્દ્રસેનાગ્રં મૃત્યોરપિ દુરાસદમ્ ॥ ૨૧॥

અભ્યર્દયન્નસમ્ભ્રાન્તાઃ સિંહનાદેન દુર્મદાઃ ।
ગદાભિઃ પરિઘૈર્બાણૈઃ પ્રાસમુદ્ગરતોમરૈઃ ॥ ૨૨॥

શૂલૈઃ પરશ્વધૈઃ ખડ્ગૈઃ શતઘ્નીભિર્ભુશુણ્ડિભિઃ ।
સર્વતોઽવાકિરન્ શસ્ત્રૈરસ્ત્રૈશ્ચ વિબુધર્ષભાન્ ॥ ૨૩॥

ન તેઽદૃશ્યન્ત સઞ્છન્નાઃ શરજાલૈઃ સમન્તતઃ ।
પુઙ્ખાનુપુઙ્ખપતિતૈર્જ્યોતીંષીવ નભોઘનૈઃ ॥ ૨૪॥

ન તે શસ્ત્રાસ્ત્રવર્ષૌઘા હ્યાસેદુઃ સુરસૈનિકાન્ ।
છિન્નાઃ સિદ્ધપથે દેવૈર્લઘુહસ્તૈઃ સહસ્રધા ॥ ૨૫॥

અથ ક્ષીણાસ્ત્રશસ્ત્રૌઘા ગિરિશ‍ૃઙ્ગદ્રુમોપલૈઃ ।
અભ્યવર્ષન્ સુરબલં ચિચ્છિદુસ્તાંશ્ચ પૂર્વવત્ ॥ ૨૬॥

તાનક્ષતાન્ સ્વસ્તિમતો નિશામ્ય
શસ્ત્રાસ્ત્રપૂગૈરથ વૃત્રનાથાઃ ।
દ્રુમૈર્દૃષદ્ભિર્વિવિધાદ્રિશ‍ૃઙ્ગૈ-
રવિક્ષતાંસ્તત્રસુરિન્દ્રસૈનિકાન્ ॥ ૨૭॥

સર્વે પ્રયાસા અભવન્ વિમોઘાઃ
કૃતાઃ કૃતા દેવગણેષુ દૈત્યૈઃ ।
કૃષ્ણાનુકૂલેષુ યથા મહત્સુ
ક્ષુદ્રૈઃ પ્રયુક્તા રુશતી રૂક્ષવાચઃ ॥ ૨૮॥

તે સ્વપ્રયાસં વિતથં નિરીક્ષ્ય
હરાવભક્તા હતયુદ્ધદર્પાઃ ।
પલાયનાયાજિમુખે વિસૃજ્ય
પતિં મનસ્તે દધુરાત્તસારાઃ ॥ ૨૯॥

વૃત્રોઽસુરાંસ્તાનનુગાન્ મનસ્વી
પ્રધાવતઃ પ્રેક્ષ્ય બભાષ એતત્ ।
પલાયિતં પ્રેક્ષ્ય બલં ચ ભગ્નં
ભયેન તીવ્રેણ વિહસ્ય વીરઃ ॥ ૩૦॥

કાલોપપન્નાં રુચિરાં મનસ્વિનાં
ઉવાચ વાચં પુરુષપ્રવીરઃ ।
હે વિપ્રચિત્તે નમુચે પુલોમન્
મયાનર્વઞ્છમ્બર મે શ ृણુધ્વમ્ ॥ ૩૧॥

જાતસ્ય મૃત્યુર્ધ્રુવ એવ સર્વતઃ
પ્રતિક્રિયા યસ્ય ન ચેહ ક્લૃપ્તા ।
લોકો યશશ્ચાથ તતો યદિ હ્યમું
કો નામ મૃત્યું ન વૃણીત યુક્તમ્ ॥ ૩૨॥

દ્વૌ સમ્મતાવિહ મૃત્યૂ દુરાપૌ
યદ્બ્રહ્મસન્ધારણયા જિતાસુઃ ।
કલેવરં યોગરતો વિજહ્યા-
ધદગ્રણીર્વીરશયેઽનિવૃત્તઃ ॥ ૩૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ઇન્દ્રવૃત્રાસુરયુદ્ધવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૧૦॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકાદશોઽધ્યાયઃ - ૧૧ ॥

શ્રીશુક ઉવાચ
ત એવં શંસતો ધર્મં વચઃ પત્યુરચેતસઃ ।
નૈવાગૃહ્ણન્ ભયત્રસ્તાઃ પલાયનપરા નૃપ ॥ ૧॥

વિશીર્યમાણાં પૃતનામાસુરીમસુરર્ષભઃ ।
કાલાનુકૂલૈસ્ત્રિદશૈઃ કાલ્યમાનામનાથવત્ ॥ ૨॥

દૃષ્ટ્વાતપ્યત સઙ્ક્રુદ્ધ ઇન્દ્રશત્રુરમર્ષિતઃ ।

તાન્ નિવાર્યૌજસા રાજન્ નિર્ભર્ત્સ્યેદમુવાચ હ ॥ ૩॥

કિં વ ઉચ્ચરિતૈર્માતુર્ધાવદ્ભિઃ પૃષ્ઠતો હતૈઃ ।
ન હિ ભીતવધઃ શ્લાઘ્યો ન સ્વર્ગ્યઃ શૂરમાનિનામ્ ॥ ૪॥

યદિ વઃ પ્રધને શ્રદ્ધા સારં વા ક્ષુલ્લકા હૃદિ ।
અગ્રે તિષ્ઠત માત્રં મે ન ચેદ્ગ્રામ્યસુખે સ્પૃહા ॥ ૫॥

એવં સુરગણાન્ ક્રુદ્ધો ભીષયન્ વપુષા રિપૂન્ ।
વ્યનદત્સુમહાપ્રાણો યેન લોકા વિચેતસઃ ॥ ૬॥

તેન દેવગણાઃ સર્વે વૃત્રવિસ્ફોટનેન વૈ ।
નિપેતુર્મૂર્ચ્છિતા ભૂમૌ યથૈવાશનિના હતાઃ ॥ ૭॥

મમર્દ પદ્ભ્યાં સુરસૈન્યમાતુરં
નિમીલિતાક્ષં રણરઙ્ગદુર્મદઃ ।
ગાં કમ્પયન્નુદ્યતશૂલ ઓજસા
નાલં વનં યૂથપતિર્યથોન્મદઃ ॥ ૮॥

વિલોક્ય તં વજ્રધરોઽત્યમર્ષિતઃ
સ્વશત્રવેઽભિદ્રવતે મહાગદામ્ ।
ચિક્ષેપ તામાપતતીં સુદુઃસહાં
જગ્રાહ વામેન કરેણ લીલયા ॥ ૯॥

સ ઇન્દ્રશત્રુઃ કુપિતો ભૃશં તયા
મહેન્દ્રવાહં ગદયોરુવિક્રમઃ ।
જઘાન કુમ્ભસ્થલ ઉન્નદન્ મૃધે
તત્કર્મ સર્વે સમપૂજયન્ નૃપ ॥ ૧૦॥

ઐરાવતો વૃત્રગદાભિમૃષ્ટો
વિઘૂર્ણિતોઽદ્રિઃ કુલિશાહતો યથા ।
અપાસરદ્ભિન્નમુખઃ સહેન્દ્રો
મુઞ્ચન્નસૃક્ સપ્તધનુર્ભૃશાર્તઃ ॥ ૧૧॥

ન સન્નવાહાય વિષણ્ણચેતસે
પ્રાયુઙ્ક્ત ભૂયઃ સ ગદાં મહાત્મા ।
ઇન્દ્રોઽમૃતસ્યન્દિકરાભિમર્શ-
વીતવ્યથક્ષતવાહોઽવતસ્થે ॥ ૧૨॥

સ તં નૃપેન્દ્રાહવકામ્યયા રિપું
વજ્રાયુધં ભ્રાતૃહણં વિલોક્ય ।
સ્મરંશ્ચ તત્કર્મ નૃશંસમંહઃ
શોકેન મોહેન હસન્ જગાદ ॥ ૧૩॥

વૃત્ર ઉવાચ
દિષ્ટ્યા ભવાન્ મે સમવસ્થિતો રિપુ-
ર્યો બ્રહ્મહા ગુરુહા ભ્રાતૃહા ચ ।
દિષ્ટ્યાનૃણોઽદ્યાહમસત્તમ ત્વયા
મચ્છૂલનિર્ભિન્નદૃષદ્ધૃદાચિરાત્ ॥ ૧૪॥

યો નોઽગ્રજસ્યાત્મવિદો દ્વિજાતે-
ર્ગુરોરપાપસ્ય ચ દીક્ષિતસ્ય ।
વિશ્રભ્ય ખડ્ગેન શિરાંસ્યવૃશ્ચ-
ત્પશોરિવાકરુણઃ સ્વર્ગકામઃ ॥ ૧૫॥

શ્રીહ્રીદયાકીર્તિભિરુજ્ઝિતં ત્વાં
સ્વકર્મણા પુરુષાદૈશ્ચ ગર્હ્યમ્ ।
કૃચ્છ્રેણ મચ્છૂલવિભિન્નદેહ-
મસ્પૃષ્ટવહ્નિં સમદન્તિ ગૃધ્રાઃ ॥ ૧૬॥

અન્યેઽનુ યે ત્વેહ નૃશંસમજ્ઞા
યે હ્યુદ્યતાસ્ત્રાઃ પ્રહરન્તિ મહ્યમ્ ।
તૈર્ભૂતનાથાન્ સગણાન્ નિશાત-
ત્રિશૂલનિર્ભિન્નગલૈર્યજામિ ॥ ૧૭॥

અથો હરે મે કુલિશેન વીર
હર્તા પ્રમથ્યૈવ શિરો યદીહ ।
તત્રાનૃણો ભૂતબલિં વિધાય
મનસ્વિનાં પાદરજઃ પ્રપત્સ્યે ॥ ૧૮॥

સુરેશ કસ્માન્ન હિનોષિ વજ્રં
પુરઃ સ્થિતે વૈરિણિ મય્યમોઘમ્ ।
મા સંશયિષ્ઠા ન ગદેવ વજ્રઃ
સ્યાન્નિષ્ફલઃ કૃપણાર્થેવ યાચ્ઞા ॥ ૧૯॥

નન્વેષ વજ્રસ્તવ શક્ર તેજસા

હરેર્દધીચેસ્તપસા ચ તેજિતઃ ।
તેનૈવ શત્રું જહિ વિષ્ણુયન્ત્રિતો
યતો હરિર્વિજયઃ શ્રીર્ગુણાસ્તતઃ ॥ ૨૦॥

અહં સમાધાય મનો યથાઽઽહ
સઙ્કર્ષણસ્તચ્ચરણારવિન્દે ।
ત્વદ્વ્રજરંહોલુલિતગ્રામ્યપાશો
ગતિં મુનેર્યામ્યપવિદ્ધલોકઃ ॥ ૨૧॥

પુંસાં કિલૈકાન્તધિયાં સ્વકાનાં
યાઃ સમ્પદો દિવિ ભૂમૌ રસાયામ્ ।
ન રાતિ યદ્દ્વેષ ઉદ્વેગ આધિ-
ર્મદઃ કલિર્વ્યસનં સમ્પ્રયાસઃ ॥ ૨૨॥

ત્રૈવર્ગિકાયાસવિઘાતમસ્મ-
ત્પતિર્વિધત્તે પુરુષસ્ય શક્ર ।
તતોઽનુમેયો ભગવત્પ્રસાદો
યો દુર્લભોઽકિઞ્ચનગોચરોઽન્યૈઃ ॥ ૨૩॥

અહં હરે તવ પાદૈકમૂલ-
દાસાનુદાસો ભવિતાસ્મિ ભૂયઃ ।
મનઃ સ્મરેતાસુપતેર્ગુણાંસ્તે
ગૃણીત વાક્કર્મ કરોતુ કાયઃ ॥ ૨૪॥

ન નાકપૃષ્ઠં ન ચ પારમેષ્ઠ્યં
ન સાર્વભૌમં ન રસાધિપત્યમ્ ।
ન યોગસિદ્ધીરપુનર્ભવં વા
સમઞ્જસ ત્વા વિરહય્ય કાઙ્ક્ષે ॥ ૨૫॥

અજાતપક્ષા ઇવ માતરં ખગાઃ
સ્તન્યં યથા વત્સતરાઃ ક્ષુધાર્તાઃ ।
પ્રિયં પ્રિયેવ વ્યુષિતં વિષણ્ણા
મનોઽરવિન્દાક્ષ દિદૃક્ષતે ત્વામ્ ॥ ૨૬॥

મમોત્તમશ્લોકજનેષુ સખ્યં
સંસારચક્રે ભ્રમતઃ સ્વકર્મભિઃ ।
ત્વન્માયયાઽઽત્માઽઽત્મજદારગેહે-

ષ્વાસક્તચિત્તસ્ય ન નાથ ભૂયાત્ ॥ ૨૭॥
ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે વૃત્રસ્ય ઇન્દ્રોપદેશો નામૈકાદશોઽધ્યાયઃ ॥ ૧૧॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દ્વાદશોઽધ્યાયઃ ॥

ઋષિરુવાચ
એવં જિહાસુર્નૃપ દેહમાજૌ
મૃત્યું વરં વિજયાન્મન્યમાનઃ ।
શૂલં પ્રગૃહ્યાભ્યપતત્સુરેન્દ્રં
યથા મહાપુરુષં કૈટભોઽપ્સુ ॥ ૧॥

તતો યુગાન્તાગ્નિકઠોરજિહ્વ-
માવિધ્ય શૂલં તરસાસુરેન્દ્રઃ ।
ક્ષિપ્ત્વા મહેન્દ્રાય વિનદ્ય વીરો
હતોઽસિ પાપેતિ રુષા જગાદ ॥ ૨॥

ખ આપતત્તદ્વિચલદ્ગ્રહોલ્કવ-
ન્નિરીક્ષ્ય દુષ્પ્રેક્ષ્યમજાતવિક્લવઃ ।
વજ્રેણ વજ્રી શતપર્વણાચ્છિન-
દ્ભુજં ચ તસ્યોરગરાજભોગમ્ ॥ ૩॥

છિન્નૈકબાહુઃ પરિઘેણ વૃત્રઃ
સંરબ્ધ આસાદ્ય ગૃહીતવજ્રમ્ ।
હનૌ તતાડેન્દ્રમથામરેભં
વજ્રં ચ હસ્તાન્ન્યપતન્મઘોનઃ ॥ ૪॥

વૃત્રસ્ય કર્માતિમહાદ્ભુતં તત્
સુરાસુરાશ્ચારણસિદ્ધસઙ્ઘાઃ ।
અપૂજયંસ્તત્પુરુહૂતસઙ્કટં
નિરીક્ષ્ય હા હેતિ વિચુક્રુશુર્ભૃશમ્ ॥ ૫॥

ઇન્દ્રો ન વજ્રં જગૃહે વિલજ્જિત-
શ્ચ્યુતં સ્વહસ્તાદરિસન્નિધૌ પુનઃ ।
તમાહ વૃત્રો હર આત્તવજ્રો
જહિ સ્વશત્રું ન વિષાદકાલઃ ॥ ૬॥

યુયુત્સતાં કુત્રચિદાતતાયિનાં
જયઃ સદૈકત્ર ન વૈ પરાત્મનામ્ ।
વિનૈકમુત્પત્તિલયસ્થિતીશ્વરં
સર્વજ્ઞમાદ્યં પુરુષં સનાતનમ્ ॥ ૭॥

લોકાઃ સપાલા યસ્યેમે શ્વસન્તિ વિવશા વશે ।
દ્વિજા ઇવ શિચા બદ્ધાઃ સ કાલ ઇહ કારણમ્ ॥ ૮॥

ઓજઃ સહો બલં પ્રાણમમૃતં મૃત્યુમેવ ચ ।
તમજ્ઞાય જનો હેતુમાત્માનં મન્યતે જડમ્ ॥ ૯॥

યથા દારુમયી નારી યથા યન્ત્રમયો મૃગઃ ।
એવં ભૂતાનિ મઘવન્નીશતન્ત્રાણિ વિદ્ધિ ભોઃ ॥ ૧૦॥

પુરુષઃ પ્રકૃતિર્વ્યક્તમાત્મા ભૂતેન્દ્રિયાશયાઃ ।
શક્નુવન્ત્યસ્ય સર્ગાદૌ ન વિના યદનુગ્રહાત્ ॥ ૧૧॥

અવિદ્વાનેવમાત્માનં મન્યતેઽનીશમીશ્વરમ્ ।
ભૂતૈઃ સૃજતિ ભૂતાનિ ગ્રસતે તાનિ તૈઃ સ્વયમ્ ॥ ૧૨॥

આયુઃ શ્રીઃ કીર્તિરૈશ્વર્યમાશિષઃ પુરુષસ્ય યાઃ ।
ભવન્ત્યેવ હિ તત્કાલે યથાનિચ્છોર્વિપર્યયાઃ ॥ ૧૩॥

તસ્માદકીર્તિયશસોર્જયાપજયયોરપિ ।
સમઃ સ્યાત્સુખદુઃખાભ્યાં મૃત્યુજીવિતયોસ્તથા ॥ ૧૪॥

સત્ત્વં રજસ્તમ ઇતિ પ્રકૃતેર્નાત્મનો ગુણાઃ ।
તત્ર સાક્ષિણમાત્માનં યો વેદ ન સ બધ્યતે ॥ ૧૫॥

પશ્ય માં નિર્જિતં શક્ર વૃક્ણાયુધભુજં મૃધે ।
ઘટમાનં યથાશક્તિ તવ પ્રાણજિહીર્ષયા ॥ ૧૬॥

પ્રાણગ્લહોઽયં સમર ઇષ્વક્ષો વાહનાસનઃ ।
અત્ર ન જ્ઞાયતેઽમુષ્ય જયોઽમુષ્ય પરાજયઃ ॥ ૧૭॥

શ્રીશુક ઉવાચ
ઇન્દ્રો વૃત્રવચઃ શ્રુત્વા ગતાલીકમપૂજયત્ ।
ગૃહીતવજ્રઃ પ્રહસંસ્તમાહ ગતવિસ્મયઃ ॥ ૧૮॥

ઇન્દ્ર ઉવાચ
અહો દાનવ સિદ્ધોઽસિ યસ્ય તે મતિરીદૃશી ।
ભક્તઃ સર્વાત્મનાઽઽત્માનં સુહૃદં જગદીશ્વરમ્ ॥ ૧૯॥

ભવાનતાર્ષીન્માયાં વૈ વૈષ્ણવીં જનમોહિનીમ્ ।
યદ્વિહાયાસુરં ભાવં મહાપુરુષતાં ગતઃ ॥ ૨૦॥

ખલ્વિદં મહદાશ્ચર્યં યદ્રજઃપ્રકૃતેસ્તવ ।
વાસુદેવે ભગવતિ સત્ત્વાત્મનિ દૃઢા મતિઃ ॥ ૨૧॥

યસ્ય ભક્તિર્ભગવતિ હરૌ નિઃશ્રેયસેશ્વરે ।
વિક્રીડતોઽમૃતામ્ભોધૌ કિં ક્ષુદ્રૈઃ ખાતકોદકૈઃ ॥ ૨૨॥

શ્રીશુક ઉવાચ
ઇતિ બ્રુવાણાવન્યોન્યં ધર્મજિજ્ઞાસયા નૃપ ।
યુયુધાતે મહાવીર્યાવિન્દ્રવૃત્રૌ યુધામ્પતી ॥ ૨૩॥

આવિધ્ય પરિઘં વૃત્રઃ કાર્ષ્ણાયસમરિન્દમઃ ।
ઇન્દ્રાય પ્રાહિણોદ્ઘોરં વામહસ્તેન મારિષ ॥ ૨૪॥

સ તુ વૃત્રસ્ય પરિઘં કરં ચ કરભોપમમ્ ।
ચિચ્છેદ યુગપદ્દેવો વજ્રેણ શતપર્વણા ॥ ૨૫॥

દોર્ભ્યામુત્કૃત્તમૂલાભ્યાં બભૌ રક્તસ્રવોઽસુરઃ ।
છિન્નપક્ષો યથા ગોત્રઃ ખાદ્ભ્રષ્ટો વજ્રિણા હતઃ ॥ ૨૬॥

કૃત્વાધરાં હનું ભૂમૌ દૈત્યો દિવ્યુત્તરાં હનુમ્ ।
નભોગમ્ભીરવક્ત્રેણ લેલિહોલ્બણજિહ્વયા ॥ ૨૭॥

દંષ્ટ્રાભિઃ કાલકલ્પાભિર્ગ્રસન્નિવ જગત્ત્રયમ્ ।
અતિમાત્રમહાકાય આક્ષિપંસ્તરસા ગિરીન્ ॥ ૨૮॥

ગિરિરાટ્ પાદચારીવ પદ્ભ્યાં નિર્જરયન્ મહીમ્ ।
જગ્રાસ સ સમાસાદ્ય વજ્રિણં સહવાહનમ્ ॥ ૨૯॥

મહાપ્રાણો મહાવીર્યો મહાસર્પ ઇવ દ્વિપમ્ ।

વૃત્રગ્રસ્તં તમાલક્ષ્ય સપ્રજાપતયઃ સુરાઃ ।
હા કષ્ટમિતિ નિર્વિણ્ણાશ્ચુક્રુશુઃ સમહર્ષયઃ ॥ ૩૦॥

નિગીર્ણોઽપ્યસુરેન્દ્રેણ ન મમારોદરં ગતઃ ।
મહાપુરુષસન્નદ્ધો યોગમાયાબલેન ચ ॥ ૩૧॥

ભિત્ત્વા વજ્રેણ તત્કુક્ષિં નિષ્ક્રમ્ય બલભિદ્વિભુઃ ।
ઉચ્ચકર્ત શિરઃ શત્રોર્ગિરિશૃઙ્ગમિવૌજસા ॥ ૩૨॥

વજ્રસ્તુ તત્કન્ધરમાશુવેગઃ
કૃન્તન્ સમન્તાત્પરિવર્તમાનઃ ।
ન્યપાતયત્તાવદહર્ગણેન
યો જ્યોતિષામયને વાર્ત્રહત્યે ॥ ૩૩॥

તદા ચ ખે દુન્દુભયો વિનેદુ-
ર્ગન્ધર્વસિદ્ધાઃ સમહર્ષિસઙ્ઘાઃ ।
વાર્ત્રઘ્નલિઙ્ગૈસ્તમભિષ્ટુવાના
મન્ત્રૈર્મુદા કુસુમૈરભ્યવર્ષન્ ॥ ૩૪॥

વૃત્રસ્ય દેહાન્નિષ્ક્રાન્તમાત્મજ્યોતિરરિન્દમ ।
પશ્યતાં સર્વલોકાનામલોકં સમપદ્યત ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે વૃત્રવધો નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ત્રયોદશોઽધ્યાયઃ - ૧૩ ॥

શ્રીશુક ઉવાચ
વૃત્રે હતે ત્રયો લોકા વિના શક્રેણ ભૂરિદ ।
સપાલા હ્યભવન્ સદ્યો વિજ્વરા નિર્વૃતેન્દ્રિયાઃ ॥ ૧॥

દેવર્ષિપિતૃભૂતાનિ દૈત્યા દેવાનુગાઃ સ્વયમ્ ।
પ્રતિજગ્મુઃ સ્વધિષ્ણ્યાનિ બ્રહ્મેશેન્દ્રાદયસ્તતઃ ॥ ૨॥

રાજોવાચ
ઇન્દ્રસ્યાનિર્વૃતેર્હેતું શ્રોતુમિચ્છામિ ભો મુને ।
યેનાસન્ સુખિનો દેવા હરેર્દુઃખં કુતોઽભવત્ ॥ ૩॥

શ્રીશુક ઉવાચ
વૃત્રવિક્રમસંવિગ્નાઃ સર્વે દેવાઃ સહર્ષિભિઃ ।
તદ્વધાયાર્થયન્નિન્દ્રં નૈચ્છદ્ભીતો બૃહદ્વધાત્ ॥ ૪॥

ઇન્દ્ર ઉવાચ
સ્ત્રીભૂજલદ્રુમૈરેનો વિશ્વરૂપવધોદ્ભવમ્ ।
વિભક્તમનુગૃહ્ણદ્ભિર્વૃત્રહત્યાં ક્વ માર્જ્મ્યહમ્ ॥ ૫॥

શ્રીશુક ઉવાચ
ઋષયસ્તદુપાકર્ણ્ય મહેન્દ્રમિદમબ્રુવન્ ।
યાજયિષ્યામ ભદ્રં તે હયમેધેન મા સ્મ ભૈઃ ॥ ૬॥

હયમેધેન પુરુષં પરમાત્માનમીશ્વરમ્ ।
ઇષ્ટ્વા નારાયણં દેવં મોક્ષ્યસેઽપિ જગદ્વધાત્ ॥ ૭॥

બ્રહ્મહા પિતૃહા ગોઘ્નો માતૃહાઽઽચાર્યહાઘવાન્ ।
શ્વાદઃ પુલ્કસકો વાપિ શુદ્ધ્યેરન્ યસ્ય કીર્તનાત્ ॥ ૮॥

તમશ્વમેધેન મહામખેન
શ્રદ્ધાન્વિતોઽસ્માભિરનુષ્ઠિતેન ।
હત્વાપિ સબ્રહ્મચરાચરં ત્વં
ન લિપ્યસે કિં ખલનિગ્રહેણ ॥ ૯॥

શ્રીશુક ઉવાચ
એવં સઞ્ચોદિતો વિપ્રૈર્મરુત્વાનહનદ્રિપુમ્ ।
બ્રહ્મહત્યા હતે તસ્મિન્નાસસાદ વૃષાકપિમ્ ॥ ૧૦॥

તયેન્દ્રઃ સ્માસહત્તાપં નિર્વૃતિર્નામુમાવિશત્ ।
હ્રીમન્તં વાચ્યતાં પ્રાપ્તં સુખયન્ત્યપિ નો ગુણાઃ ॥ ૧૧॥

તાં દદર્શાનુધાવન્તીં ચાણ્ડાલીમિવ રૂપિણીમ્ ।
જરયા વેપમાનાઙ્ગીં યક્ષ્મગ્રસ્તામસૃક્પટામ્ ॥ ૧૨॥

વિકીર્ય પલિતાન્ કેશાંસ્તિષ્ઠ તિષ્ઠેતિ ભાષિણીમ્ ।
મીનગન્ધ્યસુગન્ધેન કુર્વતીં માર્ગદૂષણમ્ ॥ ૧૩॥

નભો ગતો દિશઃ સર્વાઃ સહસ્રાક્ષો વિશામ્પતે ।
પ્રાગુદીચીં દિશં તૂર્ણં પ્રવિષ્ટો નૃપ માનસમ્ ॥ ૧૪॥

સ આવસત્પુષ્કરનાલતન્તૂ-
નલબ્ધભોગો યદિહાગ્નિદૂતઃ ।
વર્ષાણિ સાહસ્રમલક્ષિતોઽન્તઃ
સ ચિન્તયન્ બ્રહ્મવધાદ્વિમોક્ષમ્ ॥ ૧૫॥

તાવત્ત્રિણાકં નહુષઃ શશાસ
વિદ્યાતપોયોગબલાનુભાવઃ ।
સ સમ્પદૈશ્વર્યમદાન્ધબુદ્ધિ-
ર્નીતસ્તિરશ્ચાં ગતિમિન્દ્રપત્ન્યા ॥ ૧૬॥

તતો ગતો બ્રહ્મગિરોપહૂત
ઋતમ્ભરધ્યાનનિવારિતાઘઃ ।
પાપસ્તુ દિગ્દેવતયા હતૌજા-
સ્તં નાભ્યભૂદવિતં વિષ્ણુપત્ન્યા ॥ ૧૭॥

તં ચ બ્રહ્મર્ષયોઽભ્યેત્ય હયમેધેન ભારત ।
યથાવદ્દીક્ષયાઞ્ચક્રુઃ પુરુષારાધનેન હ ॥ ૧૮॥

અથેજ્યમાને પુરુષે સર્વદેવમયાત્મનિ ।
અશ્વમેધે મહેન્દ્રેણ વિતતે બ્રહ્મવાદિભિઃ ॥ ૧૯॥

સ વૈ ત્વાષ્ટ્રવધો ભૂયાનપિ પાપચયો નૃપ ।
નીતસ્તેનૈવ શૂન્યાય નીહાર ઇવ ભાનુના ॥ ૨૦॥

સ વાજિમેધેન યથોદિતેન
વિતાયમાનેન મરીચિમિશ્રૈઃ ।
ઇષ્ટ્વાધિયજ્ઞં પુરુષં પુરાણ-
મિન્દ્રો મહાનાસ વિધૂતપાપઃ ॥ ૨૧॥

ઇદં મહાખ્યાનમશેષપાપ્મનાં
પ્રક્ષાલનં તીર્થપદાનુકીર્તનમ્ ।
ભક્ત્યુચ્છ્રયં ભક્તજનાનુવર્ણનં
મહેન્દ્રમોક્ષં વિજયં મરુત્વતઃ ॥ ૨૨॥

પઠેયુરાખ્યાનમિદં સદા બુધાઃ
શૃણ્વન્ત્યથો પર્વણિ પર્વણીન્દ્રિયમ્ ।
ધન્યં યશસ્યં નિખિલાઘમોચનં
રિપુઞ્જયં સ્વસ્ત્યયનં તથાયુષમ્ ॥ ૨૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ઇન્દ્રવિજયે ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ચતુર્દશોઽધ્યાયઃ - ૧૪ ॥

પરીક્ષિદુવાચ
રજસ્તમઃસ્વભાવસ્ય બ્રહ્મન્ વૃત્રસ્ય પાપ્મનઃ ।
નારાયણે ભગવતિ કથમાસીદ્દૃઢા મતિઃ ॥ ૧॥

દેવાનાં શુદ્ધસત્ત્વાનામૃષીણાં ચામલાત્મનામ્ ।
ભક્તિર્મુકુન્દચરણે ન પ્રાયેણોપજાયતે ॥ ૨॥

રજોભિઃ સમસઙ્ખ્યાતાઃ પાર્થિવૈરિહ જન્તવઃ ।
તેષાં યે કેચનેહન્તે શ્રેયો વૈ મનુજાદયઃ ॥ ૩॥

પ્રાયો મુમુક્ષવસ્તેષાં કેચનૈવ દ્વિજોત્તમ ।
મુમુક્ષૂણાં સહસ્રેષુ કશ્ચિન્મુચ્યેત સિધ્યતિ ॥ ૪॥

મુક્તાનામપિ સિદ્ધાનાં નારાયણપરાયણઃ ।
સુદુર્લભઃ પ્રશાન્તાત્મા કોટિષ્વપિ મહામુને ॥ ૫॥

વૃત્રસ્તુ સ કથં પાપઃ સર્વલોકોપતાપનઃ ।
ઇત્થં દૃઢમતિઃ કૃષ્ણ આસીત્સઙ્ગ્રામ ઉલ્બણે ॥ ૬॥

અત્ર નઃ સંશયો ભૂયાઞ્છ્રોતું કૌતૂહલં પ્રભો ।
યઃ પૌરુષેણ સમરે સહસ્રાક્ષમતોષયત્ ॥ ૭॥

સૂત ઉવાચ
પરીક્ષિતોઽથ સમ્પ્રશ્નં ભગવાન્ બાદરાયણિઃ ।

નિશમ્ય શ્રદ્ધાનસ્ય પ્રતિનન્ધ વચોऽબ્રવીત્ ॥ ૮॥

શ્રીશુક ઉવાચ
શ‌ૃણુષ્વાવહિતો રાજન્નિતિહાસમિમં યથા ।
શ્રુતં દ્વૈપાયનમુખાન્નારદાદ્દેવલાદપિ ॥ ૯॥

આસીદ્રાજા સાર્વભૌમઃ શૂરસેનેષુ વૈ નૃપ ।
ચિત્રકેતુરિતિ ખ્યાતો યસ્યાસીત્કામધુઙ્મહી ॥ ૧૦॥

તસ્ય ભાર્યાસહસ્રાણાં સહસ્રાણિ દશાભવન્ ।
સાન્તાનિકશ્ચાપિ નૃપો ન લેભે તાસુ સન્તતિમ્ ॥ ૧૧॥

રૂપૌદાર્યવયોજન્મવિદ્યૈશ્વર્યશ્રિયાદિભિઃ ।
સમ્પન્નસ્ય ગુણૈઃ સર્વૈશ્ચિન્તા વન્ધ્યાપતેરભૂત્ ॥ ૧૨॥

ન તસ્ય સમ્પદઃ સર્વા મહિષ્યો વામલોચનાઃ ।
સાર્વભૌમસ્ય ભૂશ્ચેયમભવન્ પ્રીતિહેતવઃ ॥ ૧૩॥

તસ્યૈકદા તુ ભવનમઙ્ગિરા ભગવાન્ ઋષિઃ ।
લોકાનનુચરન્નેતાનુપાગચ્છદ્યદૃચ્છયા ॥ ૧૪॥

તં પૂજયિત્વા વિધિવત્પ્રત્યુત્થાનાર્હણાદિભિઃ ।
કૃતાતિથ્યમુપાસીદત્સુખાસીનં સમાહિતઃ ॥ ૧૫॥

મહર્ષિસ્તમુપાસીનં પ્રશ્રયાવનતં ક્ષિતૌ ।
પ્રતિપૂજ્ય મહારાજ સમાભાષ્યેદમબ્રવીત્ ॥ ૧૬॥

અઙ્ગિરા ઉવાચ
અપિ તેऽનામયં સ્વસ્તિ પ્રકૃતીનાં તથાऽऽત્મનઃ ।
યથા પ્રકૃતિભિર્ગુપ્તઃ પુમાન્ રાજાપિ સપ્તભિઃ ॥ ૧૭॥

આત્માનં પ્રકૃતિષ્વદ્ધા નિધાય શ્રેય આપ્નુયાત્ ।
રાજ્ઞા તથા પ્રકૃતયો નરદેવાહિતાધયઃ ॥ ૧૮॥

અપિ દારાઃ પ્રજામાત્યા ભૃત્યાઃ શ્રેણ્યોऽથ મન્ત્રિણઃ ।
પૌરા જાનપદા ભૂપા આત્મજા વશવર્તિનઃ ॥ ૧૯॥

યસ્યાત્માનુવશશ્ચેત્સ્યાત્સર્વે તદ્વશગા ઇમે ।
લોકાઃ સપાલા યચ્છન્તિ સર્વે બલિમતન્દ્રિતાઃ ॥ ૨૦॥

આત્મનઃ પ્રીયતે નાત્મા પરતઃ સ્વત એવ વા ।

લક્ષયેઽલબ્ધકામં ત્વાં ચિન્તયા શબલં મુખમ્ ॥ ૨૧॥

એવં વિકલ્પિતો રાજન્ વિદુષા મુનિનાપિ સઃ ।
પ્રશ્રયાવનતોઽભ્યાહ પ્રજાકામસ્તતો મુનિમ્ ॥ ૨૨॥

ચિત્રકેતુરુવાચ
ભગવન્ કિં ન વિદિતં તપોજ્ઞાનસમાધિભિઃ ।
યોગિનાં ધ્વસ્તપાપાનાં બહિરન્તઃ શરીરિષુ ॥ ૨૩॥

તથાપિ પૃચ્છતો બ્રૂયાં બ્રહ્મન્નાત્મનિ ચિન્તિતમ્ ।
ભવતો વિદુષશ્ચાપિ ચોદિતસ્ત્વદનુજ્ઞયા ॥ ૨૪॥

લોકપાલૈરપિ પ્રાર્થ્યાઃ સામ્રાજ્યૈશ્વર્યસમ્પદઃ ।
ન નન્દયન્ત્યપ્રજં માં ક્ષુત્તૃટ્કામમિવાપરે ॥ ૨૫॥

તતઃ પાહિ મહાભાગ પૂર્વૈઃ સહ ગતં તમઃ ।
યથા તરેમ દુસ્તારં પ્રજયા તદ્વિધેહિ નઃ ॥ ૨૬॥

શ્રીશુક ઉવાચ
ઇત્યર્થિતઃ સ ભગવાન્ કૃપાલુર્બ્રહ્મણઃ સુતઃ ।
શ્રપયિત્વા ચરું ત્વાષ્ટ્રં ત્વષ્ટારમયજદ્વિભુઃ ॥ ૨૭॥

જ્યેષ્ઠા શ્રેષ્ઠા ચ યા રાજ્ઞો મહિષીણાં ચ ભારત ।
નામ્ના કૃતદ્યુતિસ્તસ્યૈ યજ્ઞોચ્છિષ્ટમદાદ્દ્વિજઃ ॥ ૨૮॥

અથાહ નૃપતિં રાજન્ ભવિતૈકસ્તવાત્મજઃ ।
હર્ષશોકપ્રદસ્તુભ્યમિતિ બ્રહ્મસુતો યયૌ ॥ ૨૯॥

સાપિ તત્પ્રાશનાદેવ ચિત્રકેતોરધારયત્ ।
ગર્ભં કૃતદ્યુતિર્દેવી કૃત્તિકાગ્નેરિવાત્મજમ્ ॥ ૩૦॥

તસ્યા અનુદિનં ગર્ભઃ શુક્લપક્ષ ઇવોડુપઃ ।
વવૃધે શૂરસેનેશતેજસા શનકૈર્નૃપ ॥ ૩૧॥

અથ કાલ ઉપાવૃત્તે કુમારઃ સમજાયત ।
જનયન્ શૂરસેનાનાં શ ृણ્વતાં પરમાં મુદમ્ ॥ ૩૨॥

હૃષ્ટો રાજા કુમારસ્ય સ્નાતઃ શુચિરલઙ્કૃતઃ ।
વાચયિત્વાઽઽશિષો વિપ્રૈઃ કારયામાસ જાતકમ્ ॥ ૩૩॥

તેભ્યો હિરણ્યં રજતં વાસાંસ્યાભરણાનિ ચ ।

ગ્રામાન્ હયાન્ ગજાન્ પ્રાદાદ્ધેનૂનામર્બુદાનિ ષટ્ ॥ ૩૪॥

વવર્ષ કામમન્યેષાં પર્જન્ય ઇવ દેહિનામ્ ।
ધન્યં યશસ્યમાયુષ્યં કુમારસ્ય મહામનાઃ ॥ ૩૫॥

કૃચ્છ્રલબ્ધેઽથ રાજર્ષેસ્તનયેઽનુદિનં પિતુઃ ।
યથા નિઃસ્વસ્ય કૃચ્છ્રાપ્તે ધને સ્નેહોઽન્વવર્ધત ॥ ૩૬॥

માતુસ્ત્વતિતરાં પુત્રે સ્નેહો મોહસમુદ્ભવઃ ।
કૃતદ્યુતેઃ સપત્નીનાં પ્રજાકામજ્વરોઽભવત્ ॥ ૩૭॥

ચિત્રકેતોરતિપ્રીતિર્યથા દારે પ્રજાવતિ ।
ન તથાન્યેષુ સઞ્જજ્ઞે બાલં લાલયતોઽન્વહમ્ ॥ ૩૮॥

તાઃ પર્યતપ્યન્નાત્માનં ગર્હયન્ત્યોઽભ્યસૂયયા ।
આનપત્યેન દુઃખેન રાજ્ઞોઽનાદરેણ ચ ॥ ૩૯॥

ધિગપ્રજાં સ્ત્રિયં પાપાં પત્યુશ્ચાગૃહસમ્મતામ્ ।
સુપ્રજાભિઃ સપત્નીભિર્દાસીમિવ તિરસ્કૃતામ્ ॥ ૪૦॥

દાસીનાં કો નુ સન્તાપઃ સ્વામિનઃ પરિચર્યયા ।
અભીક્ષ્ણં લબ્ધમાનાનાં દાસ્યા દાસીવ દુર્ભગાઃ ॥ ૪૧॥

એવં સન્દહ્યમાનાનાં સપત્ન્યાઃ પુત્રસમ્પદા ।
રાજ્ઞોઽસમ્મતવૃત્તીનાં વિદ્વેષો બલવાનભૂત્ ॥ ૪૨॥

વિદ્વેષનષ્ટમતયઃ સ્ત્રિયો દારુણચેતસઃ ।
ગરં દદુઃ કુમારાય દુર્મર્ષા નૃપતિં પ્રતિ ॥ ૪૩॥

કૃતદ્યુતિરજાનન્તી સપત્નીનામઘં મહત્ ।
સુપ્ત એવેતિ સઞ્ચિન્ત્ય નિરીક્ષ્ય વ્યચરદ્ગૃહે ॥ ૪૪॥

શયાનં સુચિરં બાલમુપધાર્ય મનીષિણી ।
પુત્રમાનય મે ભદ્રે ઇતિ ધાત્રીમચોદયત્ ॥ ૪૫॥

સા શયાનમુપવ્રજ્ય દૃષ્ટ્વા ચોત્તારલોચનમ્ ।
પ્રાણેન્દ્રિયાત્મભિસ્ત્યક્તં હતાસ્મીત્યપતદ્ભુવિ ॥ ૪૬॥

તસ્યાસ્તદાકર્ણ્ય ભૃશાતુરં સ્વરં
ઘ્નન્ત્યાઃ કરાભ્યામુર ઉચ્ચકૈરપિ ।
પ્રવિશ્ય રાજ્ઞી ત્વરયાઽઽત્મજાન્તિકં

દદર્શ બાલં સહસા મૃતં સુતમ્ ॥ ૪૭॥

પપાત ભૂમૌ પરિવૃદ્ધયા શુચા
મુમોહ વિભ્રષ્ટશિરોરુહામ્બરા ॥ ૪૮॥

તતો નૃપાન્તઃપુરવર્તિનો જના
નરાશ્ચ નાર્યશ્ચ નિશમ્ય રોદનમ્ ।
આગત્ય તુલ્યવ્યસનાઃ સુદુઃખિતા-
સ્તાશ્ચ વ્યલીકં રુરુદુઃ કૃતાગસઃ ॥ ૪૯॥

શ્રુત્વા મૃતં પુત્રમલક્ષિતાન્તકં
વિનષ્ટદૃષ્ટિઃ પ્રપતન્ સ્ખલન્ પથિ ।
સ્નેહાનુબન્ધૈધિતયા શુચા ભૃશં
વિમૂર્ચ્છિતોઽનુપ્રકૃતિર્દ્વિજૈર્વૃતઃ ॥ ૫૦॥

પપાત બાલસ્ય સ પાદમૂલે
મૃતસ્ય વિસ્રસ્તશિરોરુહામ્બરઃ ।
દીર્ઘં શ્વસન્ બાષ્પકલોપરોધતો
નિરુદ્ધકણ્ઠો ન શશાક ભાષિતુમ્ ॥ ૫૧॥

પતિં નિરીક્ષ્યોરુશુચાર્પિતં તદા
મૃતં ચ બાલં સુતમેકસન્તતિમ્ ।
જનસ્ય રાજ્ઞી પ્રકૃતેશ્ચ હૃદ્રુજં
સતી દધાના વિલલાપ ચિત્રધા ॥ ૫૨॥

સ્તનદ્વયં કુઙ્કુમગન્ધમણ્ડિતં
નિષિઞ્ચતી સાઞ્જનબાષ્પબિન્દુભિઃ ।
વિકીર્ય કેશાન્ વિગલત્સ્રજઃ સુતં
શુશોચ ચિત્રં કુરરીવ સુસ્વરમ્ ॥ ૫૩॥

અહો વિધાતસ્ત્વમતીવ બાલિશો
યસ્ત્વાત્મસૃષ્ટ્યપ્રતિરૂપમીહસે ।
પરે નુ જીવત્યપરસ્ય યા મૃતિ-
ર્વિપર્યયશ્ચેત્ત્વમસિ ધ્રુવઃ પરઃ ॥ ૫૪॥

ન હિ ક્રમશ્ચેદિહ મૃત્યુજન્મનોઃ
શરીરિણામસ્તુ તદાત્મકર્મભિઃ ।

યઃ સ્નેહપાશો નિજસર્ગવૃદ્ધયે
સ્વયં કૃતસ્તે તમિમં વિવૃશ્ચસિ ॥ ૫૫॥

ત્વં તાત નાર્હસિ ચ માં કૃપણામનાથાં
ત્યક્તું વિચક્ષ્વ પિતરં તવ શોકતપ્તમ્ ।
અઞ્જસ્તરેમ ભવતાપ્રજદુસ્તરં યદ્-
ધ્વાન્તં ન યાહ્યકરુણેન યમેન દૂરમ્ ॥ ૫૬॥

ઉત્તિષ્ઠ તાત ત ઇમે શિશવો વયસ્યા-
સ્ત્વામાહ્વયન્તિ નૃપનન્દન સંવિહર્તુમ્ ।
સુપ્તશ્ચિરં હ્યશનયા ચ ભવાન્ પરીતો
ભુઙ્ક્ષ્વ સ્તનં પિબ શુચો હર નઃ સ્વકાનામ્ ॥ ૫૭॥

નાહં તનૂજ દદૃશે હતમઙ્ગલા તે
મુગ્ધસ્મિતં મુદિતવીક્ષણમાનનાબ્જમ્ ।
કિં વા ગતોઽસ્યપુનરન્વયમન્યલોકં
નીતોઽઘૃણેન ન શૃણોમિ કલા ગિરસ્તે ॥ ૫૮॥

શ્રીશુક ઉવાચ
વિલપન્ત્યા મૃતં પુત્રમિતિ ચિત્રવિલાપનૈઃ ।
ચિત્રકેતુર્ભૃશં તપ્તો મુક્તકણ્ઠો રુરોદ હ ॥ ૫૯॥

તયોર્વિલપતોઃ સર્વે દમ્પત્યોસ્તદનુવ્રતાઃ ।
રુરુદુઃ સ્મ નરા નાર્યઃ સર્વમાસીદચેતનમ્ ॥ ૬૦॥

એવં કશ્મલમાપન્નં નષ્ટસંજ્ઞમનાયકમ્ ।
જ્ઞાત્વાઙ્ગિરા નામ મુનિરાજગામ સનારદઃ ॥ ૬૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ચિત્રકેતુવિલાપો નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ પઞ્ચદશોઽધ્યાયઃ - ૧૫ ॥

શ્રીશુક ઉવાચ
ઊચતુર્મૃતકોપાન્તે પતિતં મૃતકોપમમ્ ।
શોકાભિભૂતં રાજાનં બોધયન્તૌ સદુક્તિભિઃ ॥ ૧॥

કોઽયં સ્યાત્તવ રાજેન્દ્ર ભવાન્ યમનુશોચતિ ।
ત્વં ચાસ્ય કતમઃ સૃષ્ટૌ પુરેદાનીમતઃ પરમ્ ॥ ૨॥

યથા પ્રયાન્તિ સંયાન્તિ સ્રોતોવેગેન વાલુકાઃ ।
સંયુજ્યન્તે વિયુજ્યન્તે તથા કાલેન દેહિનઃ ॥ ૩॥

યથા ધાનાસુ વૈ ધાના ભવન્તિ ન ભવન્તિ ચ ।
એવં ભૂતેષુ ભૂતાનિ ચોદિતાનીશમાયયા ॥ ૪॥

વયં ચ ત્વં ચ યે ચેમે તુલ્યકાલાશ્ચરાચરાઃ ।
જન્મમૃત્યોર્યથા પશ્ચાત્પ્રાઙ્ નૈવમધુનાપિ ભોઃ ॥ ૫॥

ભૂતૈર્ભૂતાનિ ભૂતેશઃ સૃજત્યવતિ હન્ત્યજઃ ।
આત્મસૃષ્ટૈરસ્વતન્ત્રૈરનપેક્ષોઽપિ બાલવત્ ॥ ૬॥

દેહેન દેહિનો રાજન્ દેહાદ્દેહોઽભિજાયતે ।
બીજાદેવ યથા બીજં દેહ્યર્થ ઇવ શાશ્વતઃ ॥ ૭॥

દેહદેહિવિભાગોઽયમવિવેકકૃતઃ પુરા ।
જાતિવ્યક્તિવિભાગોઽયં યથા વસ્તુનિ કલ્પિતઃ ॥ ૮॥

શ્રીશુક ઉવાચ
એવમાશ્વાસિતો રાજા ચિત્રકેતુર્દ્વિજોક્તિભિઃ ।
પ્રમૃજ્ય પાણિના વક્ત્રમાધિમ્લાનમભાષત ॥ ૯॥

રાજોવાચ
કૌ યુવાં જ્ઞાનસમ્પન્નૌ મહિષ્ઠૌ ચ મહીયસામ્ ।
અવધૂતેન વેષેણ ગૂઢાવિહ સમાગતૌ ॥ ૧૦॥

ચરન્તિ હ્યવનૌ કામં બ્રાહ્મણા ભગવત્પ્રિયાઃ ।
માદૃશાં ગ્રામ્યબુદ્ધીનાં બોધાયોન્મત્તલિઙ્ગિનઃ ॥ ૧૧॥

કુમારો નારદ ઋભુરઙ્ગિરા દેવલોઽસિતઃ ।
અપાન્તરતમો વ્યાસો માર્કણ્ડેયોઽથ ગૌતમઃ ॥ ૧૨॥

વસિષ્ઠો ભગવાન્ રામઃ કપિલો બાદરાયણિઃ ।
દુર્વાસા યાજ્ઞવલ્ક્યશ્ચ જાતૂકર્ણ્યસ્તથારુણિઃ ॥ ૧૩ ॥

રોમશશ્ચ્યવનો દત્ત આસુરિઃ સપતઞ્જલિઃ ।
ઋષિર્વેદશિરા બોધ્યઃ મુનિઃ પઞ્ચશિરાસ્તથા ॥ ૧૪ ॥

હિરણ્યનાભઃ કૌસલ્યઃ શ્રુતદેવ ઋતધ્વજઃ ।
એતે પરે ચ સિદ્ધેશાશ્ચરન્તિ જ્ઞાનહેતવઃ ॥ ૧૫ ॥

તસ્માદ્યુવાં ગ્રામ્યપશોર્મમ મૂઢધિયઃ પ્રભૂ ।
અન્ધે તમસિ મગ્નસ્ય જ્ઞાનદીપ ઉદીર્યતામ્ ॥ ૧૬ ॥

અઙ્ગિરા ઉવાચ
અહં તે પુત્રકામસ્ય પુત્રદોઽસ્મ્યઙ્ગિરા નૃપ ।
એષ બ્રહ્મસુતઃ સાક્ષાન્નારદો ભગવાન્ ઋષિઃ ॥ ૧૭ ॥

ઇત્થં ત્વાં પુત્રશોકેન મગ્નં તમસિ દુસ્તરે ।
અતદર્હમનુસ્મૃત્ય મહાપુરુષગોચરમ્ ॥ ૧૮ ॥

અનુગ્રહાય ભવતઃ પ્રાપ્તાવાવામિહ પ્રભો ।
બ્રહ્મણ્યો ભગવદ્ભક્તો નાવસીદિતુમર્હતિ ॥ ૧૯ ॥

તદૈવ તે પરં જ્ઞાનં દદામિ ગૃહમાગતઃ ।
જ્ઞાત્વાન્યાભિનિવેશં તે પુત્રમેવ દદાવહમ્ ॥ ૨૦ ॥

અધુના પુત્રિણાં તાપો ભવતૈવાનુભૂયતે ।
એવં દારા ગૃહા રાયો વિવિધૈશ્વર્યસમ્પદઃ ॥ ૨૧ ॥

શબ્દાદયશ્ચ વિષયાશ્ચલા રાજ્યવિભૂતયઃ ।
મહી રાજ્યં બલં કોશો ભૃત્યામાત્યસુહૃજ્જનાઃ ॥ ૨૨ ॥

સર્વેઽપિ શૂરસેનેમે શોકમોહભયાર્તિદાઃ ।
ગન્ધર્વનગરપ્રખ્યાઃ સ્વપ્નમાયામનોરથાઃ ॥ ૨૩ ॥

દૃશ્યમાના વિનાર્થેન ન દૃશ્યન્તે મનોભવાઃ ।
કર્મભિર્ધ્યાયતો નાનાકર્માણિ મનસોઽભવન્ ॥ ૨૪ ॥

અયં હિ દેહિનો દેહો દ્રવ્યજ્ઞાનક્રિયાત્મકઃ ।
દેહિનો વિવિધક્લેશસન્તાપકૃદુદાહૃતઃ ॥ ૨૫ ॥

તસ્માત્સ્વસ્થેન મનસા વિમૃશ્ય ગતિમાત્મનઃ ।

દ્વૈતે ધ્રુવાર્થવિશ્રમ્ભં ત્યજોપશમમાવિશ ॥ ૨૬॥

નારદ ઉવાચ
એતાં મન્ત્રોપનિષદં પ્રતીચ્છ પ્રયતો મમ ।
યાં ધારયન્ સપ્તરાત્રાદ્દ્રષ્ટા સઙ્કર્ષણં પ્રભુમ્ ॥ ૨૭॥

યત્પાદમૂલમુપસૃત્ય નરેન્દ્ર પૂર્વે
શર્વાદયો ભ્રમમિમં દ્વિતયં વિસૃજ્ય ।
સદ્યસ્તદીયમતુલાનધિકં મહિત્વં
પ્રાપુર્ભવાનપિ પરં ન ચિરાદુપૈતિ ॥ ૨૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ચિત્રકેતુસાન્ત્વનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ષોડશોઽધ્યાયઃ - ૧૬ ॥

શ્રીશુક ઉવાચ
અથ દેવઋષી રાજન્ સમ્પરેતં નૃપાત્મજમ્ ।
દર્શયિત્વેતિ હોવાચ જ્ઞાતીનામનુશોચતામ્ ॥ ૧॥

નારદ ઉવાચ
જીવાત્મન્ પશ્ય ભદ્રં તે માતરં પિતરં ચ તે ।
સુહૃદો બાન્ધવાસ્તપ્તાઃ શુચા ત્વત્કૃતયા ભૃશમ્ ॥ ૨॥

કલેવરં સ્વમાવિશ્ય શેષમાયુઃ સુહૃદ્વૃતઃ ।
ભુઙ્ક્ષ્વ ભોગાન્ પિતૃપ્રત્તાનધિતિષ્ઠ નૃપાસનમ્ ॥ ૩॥

જીવ ઉવાચ
કસ્મિન્ જન્મન્યમી મહ્યં પિતરો માતરોઽભવન્ ।
કર્મભિર્ભ્રામ્યમાણસ્ય દેવતિર્યઙ્નૃયોનિષુ ॥ ૪॥

બન્ધુજ્ઞાત્યરિમધ્યસ્થમિત્રોદાસીનવિદ્વિષઃ ।
સર્વ એવ હિ સર્વેષાં ભવન્તિ ક્રમશો મિથઃ ॥ ૫॥

યથા વસ્તૂનિ પણ્યાનિ હેમાદીનિ તતસ્તતઃ ।
પર્યટન્તિ નરેષ્વેવં જીવો યોનિષુ કર્તૃષુ ॥ ૬॥

નિત્યસ્યાર્થસ્ય સમ્બન્ધો હ્યનિત્યો દૃશ્યતે નૃષુ ।
યાવદ્યસ્ય હિ સમ્બન્ધો મમત્વં તાવદેવ હિ ॥ ૭॥

એવં યોનિગતો જીવઃ સ નિત્યો નિરહઙ્કૃતઃ ।
યાવદ્યત્રોપલભ્યેત તાવત્સ્વત્વં હિ તસ્ય તત્ ॥ ૮॥

એષ નિત્યોઽવ્યયઃ સૂક્ષ્મ એષ સર્વાશ્રયઃ સ્વદૃક્ ।
આત્મમાયાગુણૈર્વિશ્વમાત્માનં સૃજતિ પ્રભુઃ ॥ ૯॥

ન હ્યસ્યાતિપ્રિયઃ કશ્ચિન્ નાપ્રિયઃ સ્વઃ પરોઽપિ વા ।
એકઃ સર્વધિયાં દ્રષ્ટા કર્તૄણાં ગુણદોષયોઃ ॥ ૧૦॥

નાદત્ત આત્મા હિ ગુણં ન દોષં ન ક્રિયાફલમ્ ।
ઉદાસીનવદાસીનઃ પરાવરદૃગીશ્વરઃ ॥ ૧૧॥

શ્રીશુક ઉવાચ
ઇત્યુદીર્ય ગતો જીવો જ્ઞાતયસ્તસ્ય તે તદા ।
વિસ્મિતા મુમુચુઃ શોકં છિત્ત્વાઽઽત્મસ્નેહશૃઙ્ખલામ્ ॥ ૧૨॥

નિર્હૃત્ય જ્ઞાતયો જ્ઞાતેર્દેહં કૃત્વોચિતાઃ ક્રિયાઃ ।
તત્યજુર્દુસ્ત્યજં સ્નેહં શોકમોહભયાર્તિદમ્ ॥ ૧૩॥

બાલઘ્ન્યો વ્રીડિતાસ્તત્ર બાલહત્યાહતપ્રભાઃ ।
બાલહત્યાવ્રતં ચેરુર્બ્રાહ્મણૈર્યન્નિરૂપિતમ્ ।
યમુનાયાં મહારાજ સ્મરન્ત્યો દ્વિજભાષિતમ્ ॥ ૧૪॥

સ ઇત્થં પ્રતિબુદ્ધાત્મા ચિત્રકેતુર્દ્વિજોક્તિભિઃ ।
ગૃહાન્ધકૂપાન્નિષ્ક્રાન્તઃ સરઃપઙ્કાદિવ દ્વિપઃ ॥ ૧૫॥

કાલિન્દ્યાં વિધિવત્સ્નાત્વા કૃતપુણ્યજલક્રિયઃ ।
મૌનેન સંયતપ્રાણો બ્રહ્મપુત્રાવવન્દત ॥ ૧૬॥

અથ તસ્મૈ પ્રપન્નાય ભક્તાય પ્રયતાત્મને ।
ભગવાન્નારદઃ પ્રીતો વિદ્યામેતામુવાચ હ ॥ ૧૭॥

ઓં નમસ્તુભ્યં ભગવતે વાસુદેવાય ધીમહિ ।
પ્રદ્યુમ્નાયાનિરુદ્ધાય નમઃ સઙ્કર્ષણાય ચ ॥ ૧૮॥

નમો વિજ્ઞાનમાત્રાય પરમાનન્દમૂર્તયે ।
આત્મારામાય શાન્તાય નિવૃત્તદ્વૈતદૃષ્ટયે ॥ ૧૯॥

આત્માનન્દાનુભૂત્યૈવ ન્યસ્તશક્ત્યૂર્મયે નમઃ ।
હૃષીકેશાય મહતે નમસ્તે વિશ્વમૂર્તયે ॥ ૨૦॥

વચસ્યુપરતેઽપ્રાપ્ય ય એકો મનસા સહ ।
અનામરૂપશ્ચિન્માત્રઃ સોઽવ્યાન્નઃ સદસત્પરઃ ॥ ૨૧॥

યસ્મિન્નિદં યતશ્ચેદં તિષ્ઠત્યપ્યેતિ જાયતે ।
મૃણ્મયેષ્વિવ મૃજ્જાતિસ્તસ્મૈ તે બ્રહ્મણે નમઃ ॥ ૨૨॥

યન્ન સ્પૃશન્તિ ન વિદુર્મનોબુદ્ધીન્દ્રિયાસવઃ ।
અન્તર્બહિશ્ચ વિતતં વ્યોમવત્તન્નતોઽસ્મ્યહમ્ ॥ ૨૩॥

દેહેન્દ્રિયપ્રાણમનોધિયોઽમી
યદંશવિદ્ધાઃ પ્રચરન્તિ કર્મસુ ।
નૈવાન્યદા લોહમિવાપ્રતપ્તં
સ્થાનેષુ તદ્દ્રષ્ટ્રપદેશમેતિ ॥ ૨૪॥

ઓં નમો ભગવતે મહાપુરુષાય મહાનુભાવાય
મહાવિભૂતિપતયે સકલસાત્વતપરિવૃઢ-
નિકરકરકમલકુડ્મલોપલાલિતચરણા-
રવિન્દયુગલ પરમ પરમેષ્ઠિન્ નમસ્તે ॥ ૨૫॥

શ્રીશુક ઉવાચ
ભક્તાયૈતાં પ્રપન્નાય વિદ્યામાદિશ્ય નારદઃ ।
યયાવઙ્ગિરસા સાકં ધામ સ્વાયમ્ભુવં પ્રભો ॥ ૨૬॥

ચિત્રકેતુસ્તુ વિદ્યાં તાં યથા નારદભાષિતામ્ ।
ધારયામાસ સપ્તાહમબ્ભક્ષઃ સુસમાહિતઃ ॥ ૨૭॥

તતઃ સ સપ્તરાત્રાન્તે વિદ્યયા ધાર્યમાણયા ।
વિદ્યાધરાધિપત્યં સ લેભેઽપ્રતિહતં નૃપ ॥ ૨૮॥

તતઃ કતિપયાહોભિર્વિદ્યયેદ્ધમનોગતિઃ ।
જગામ દેવદેવસ્ય શેષસ્ય ચરણાન્તિકમ્ ॥ ૨૯॥

મૃણાલગૌરં શિતિવાસસં સ્ફુર-

ત્કિરીટકેયૂરકટિત્રકઙ્કણમ્ ।
પ્રસન્નવક્ત્રારુણલોચનં વૃતં
દદર્શ સિદ્ધેશ્વરમણ્ડલૈઃ પ્રભુમ્ ॥ ૩૦॥

તદ્દર્શનધ્વસ્તસમસ્તકિલ્બિષઃ
સ્વસ્થામલાન્તઃકરણોઽભ્યયાન્મુનિઃ ।
પ્રવૃદ્ધભક્ત્યા પ્રણયાશ્રુલોચનઃ
પ્રહૃષ્ટરોમાઽઽનમદાદિપૂરુષમ્ ॥ ૩૧॥

સ ઉત્તમશ્લોકપદાબ્જવિષ્ટરં
પ્રેમાશ્રુલેશૈરુપમેહયન્ મુહુઃ ।
પ્રેમોપરુદ્ધાખિલવર્ણનિર્ગમો
નૈવાશકત્તં પ્રસમીડિતું ચિરમ્ ॥ ૩૨॥

તતઃ સમાધાય મનો મનીષયા
બભાષ એતત્પ્રતિલબ્ધવાગસૌ ।
નિયમ્ય સર્વેન્દ્રિયબાહ્યવર્તનં
જગદ્ગુરું સાત્વતશાસ્ત્રવિગ્રહમ્ ॥ ૩૩॥

ચિત્રકેતુરુવાચ
અજિત જિતઃ સમમતિભિઃ સાધુભિ-
ર્ભવાન્ જિતાત્મભિર્ભવતા ।
વિજિતાસ્તેઽપિ ચ ભજતામકામાત્મનાં
ય આત્મદોઽતિકરુણઃ ॥ ૩૪॥

તવ વિભવઃ ખલુ ભગવન્
જગદુદયસ્થિતિલયાદીનિ ।
વિશ્વસૃજસ્તેંઽશાંશાસ્તત્ર
મૃષા સ્પર્ધન્તે પૃથગભિમત્યા ॥ ૩૫॥

પરમાણુપરમમહતોસ્ત્વ-
માદ્યન્તાન્તરવર્તી ત્રયવિધુરઃ ।
આદાવન્તેઽપિ ચ સત્ત્વાનાં
યદ્ધ્રુવં તદેવાન્તરાલેઽપિ ॥ ૩૬॥

ક્ષિત્યાદિભિરેષ કિલાવૃતઃ
સપ્તભિર્દશગુણોત્તરૈરણ્ડકોશઃ ।

યત્ર પતત્યણુકલ્પઃ
સહાણ્ડકોટિકોટિભિસ્તદનન્તઃ ॥ ૩૭॥

વિષયતૃષો નરપશવો
ય ઉપાસતે વિભૂતીર્ન પરં ત્વામ્ ।
તેષામાશિષ ઈશ તદનુ
વિનશ્યન્તિ યથા રાજકુલમ્ ॥ ૩૮॥

કામધિયસ્ત્વયિ રચિતા
ન પરમ રોહન્તિ યથા કરમ્ભબીજાનિ ।
જ્ઞાનાત્મન્યગુણમયે
ગુણગણતોઽસ્ય દ્વન્દ્વજાલાનિ ॥ ૩૯॥

જિતમજિત તદા ભવતા
યદાહ ભાગવતં ધર્મમનવદ્યમ્ ।
નિષ્કિઞ્ચના યે મુનય આત્મારામા
યમુપાસતેઽપવર્ગાય ॥ ૪૦॥

વિષમમતિર્ન યત્ર નૃણાં
ત્વમહમિતિ મમ તવેતિ ચ યદન્યત્ર ।
વિષમધિયા રચિતો યઃ
સ હ્યવિશુદ્ધઃ ક્ષયિષ્ણુરધર્મબહુલઃ ॥ ૪૧॥

કઃ ક્ષેમો નિજપરયોઃ
કિયાનર્થઃ સ્વપરદ્રુહા ધર્મેણ ।
સ્વદ્રોહાત્તવ કોપઃ
પરસમ્પીડયા ચ તથાધર્મઃ ॥ ૪૨॥

ન વ્યભિચરતિ તવેક્ષા યયા
હ્યભિહિતો ભાગવતો ધર્મઃ ।
સ્થિરચરસત્ત્વકદમ્બેષ્વપૃથગ્ધિયો
યમુપાસતે ત્વાર્યાઃ ॥ ૪૩॥

ન હિ ભગવન્નઘટિતમિદં
ત્વદ્દર્શનાન્નૃણામખિલપાપક્ષયઃ ।
યન્નામ સકૃચ્છ્રવણાત્પુલ્કસકોઽપિ
વિમુચ્યતે સંસારાત્ ॥ ૪૪॥

અથ ભગવન્ વયમધુના
ત્વદવલોકપરિમૃષ્ટાશયમલાઃ ।
સુરઋષિણા યદુદિતં તાવકેન
કથમન્યથા ભવતિ ॥ ૪૫॥

વિદિતમનન્ત સમસ્તં તવ
જગદાત્મનો જનૈરિહાચરિતમ્ ।
વિજ્ઞાપ્યં પરમગુરોઃ કિયદિવ
સવિતુરિવ ખદ્યોતૈઃ ॥ ૪૬॥

નમસ્તુભ્યં ભગવતે સકલજગ-
ત્સ્થિતિલયોદયેશાય ।
દુરવસિતાત્મગતયે
કુયોગિનાં ભિદા પરમહંસાય ॥ ૪૭॥

યં વૈ શ્વસન્તમનુ વિશ્વસૃજઃ શ્વસન્તિ
યં ચેકિતાનમનુ ચિત્તય ઉચ્ચકન્તિ ।
ભૂમણ્ડલં સર્ષપાયતિ યસ્ય મૂર્ધ્નિ
તસ્મૈ નમો ભગવતેઽસ્તુ સહસ્રમૂર્ધ્ને ॥ ૪૮॥

શ્રીશુક ઉવાચ
સંસ્તુતો ભગવાનેવમનન્તસ્તમભાષત ।
વિદ્યાધરપતિં પ્રીતશ્ચિત્રકેતું કુરૂદ્વહ ॥ ૪૯॥

શ્રીભગવાનુવાચ
યન્નારદાઙ્ગિરોભ્યાં તે વ્યાહૃતં મેઽનુશાસનમ્ ।
સંસિદ્ધોઽસિ તયા રાજન્ વિદ્યયા દર્શનાચ્ચ મે ॥ ૫૦॥

અહં વૈ સર્વભૂતાનિ ભૂતાત્મા ભૂતભાવનઃ ।
શબ્દબ્રહ્મ પરં બ્રહ્મ મમોભે શાશ્વતી તનૂ ॥ ૫૧॥

લોકે વિતતમાત્માનં લોકં ચાત્મનિ સન્તતમ્ ।
ઉભયં ચ મયા વ્યાપ્તં મયિ ચૈવોભયં કૃતમ્ ॥ ૫૨॥

યથા સુષુપ્તઃ પુરુષો વિશ્વં પશ્યતિ ચાત્મનિ ।
આત્માનમેકદેશસ્થં મન્યતે સ્વપ્ન ઉત્થિતઃ ॥ ૫૩॥

એવં જાગરણાદીનિ જીવસ્થાનાનિ ચાત્મનઃ ।
માયામાત્રાણિ વિજ્ઞાય તદ્દ્રષ્ટારં પરં સ્મરેત્ ॥ ૫૪॥

યેન પ્રસુપ્તઃ પુરુષઃ સ્વાપં વેદાત્મનસ્તદા ।
સુખં ચ નિર્ગુણં બ્રહ્મ તમાત્માનમવેહિ મામ્ ॥ ૫૫॥

ઉભયં સ્મરતઃ પુંસઃ પ્રસ્વાપપ્રતિબોધયોઃ ।
અન્વેતિ વ્યતિરિચ્યેત તજ્જ્ઞાનં બ્રહ્મ તત્પરમ્ ॥ ૫૬॥

યદેતદ્વિસ્મૃતં પુંસો મદ્ભાવં ભિન્નમાત્મનઃ ।
તતઃ સંસાર એતસ્ય દેહાદ્દેહો મૃતેર્મૃતિઃ ॥ ૫૭॥

લબ્ધ્વેહ માનુષીં યોનિં જ્ઞાનવિજ્ઞાનસમ્ભવામ્ ।
આત્માનં યો ન બુદ્ધ્યેત ન ક્વચિત્ક્ષેમમાપ્નુયાત્ ॥ ૫૮॥

સ્મૃત્વેહાયાં પરિક્લેશં તતઃ ફલવિપર્યયમ્ ।
અભયં ચાપ્યનીહાયાં સઙ્કલ્પાદ્વિરમેત્કવિઃ ॥ ૫૯॥

સુખાય દુઃખમોક્ષાય કુર્વાતે દમ્પતી ક્રિયાઃ ।
તતોઽનિવૃત્તિરપ્રાપ્તિર્દુઃખસ્ય ચ સુખસ્ય ચ ॥ ૬૦॥

એવં વિપર્યયં બુદ્ધ્વા નૃણાં વિજ્ઞાભિમાનિનામ્ ।
આત્મનશ્ચ ગતિં સૂક્ષ્માં સ્થાનત્રયવિલક્ષણામ્ ॥ ૬૧॥

દૃષ્ટશ્રુતાભિર્માત્રાભિર્નિર્મુક્તઃ સ્વેન તેજસા ।
જ્ઞાનવિજ્ઞાનસન્તુષ્ટો મદ્ભક્તઃ પુરુષો ભવેત્ ॥ ૬૨॥

એતાવાનેવ મનુજૈર્યોગનૈપુણ્યબુદ્ધિભિઃ ।
સ્વાર્થઃ સર્વાત્મના જ્ઞેયો યત્પરાત્મૈકદર્શનમ્ ॥ ૬૩॥

ત્વમેતચ્છ્રદ્ધયા રાજન્નપ્રમત્તો વચો મમ ।
જ્ઞાનવિજ્ઞાનસમ્પન્નો ધારયન્નાશુ સિધ્યસિ ॥ ૬૪॥

શ્રીશુક ઉવાચ
આશ્વાસ્ય ભગવાનિત્થં ચિત્રકેતું જગદ્ગુરુઃ ।
પશ્યતસ્તસ્ય વિશ્વાત્મા તતશ્ચાન્તર્દધે હરિઃ ॥ ૬૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ચિત્રકેતોઃ પરમાત્મદર્શનં
નામ ષોડશોઽધ્યાયઃ ॥ ૧૬॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ સપ્તદશોઽધ્યાયઃ - ૧૭ ॥

શ્રીશુક ઉવાચ
યતશ્ચાન્તર્હિતોઽનન્તસ્તસ્યૈ કૃત્વા દિશે નમઃ ।
વિદ્યાધરશ્ચિત્રકેતુશ્ચચાર ગગનેચરઃ ॥ ૧॥

સ લક્ષં વર્ષલક્ષાણામવ્યાહતબલેન્દ્રિયઃ ।
સ્તૂયમાનો મહાયોગી મુનિભિઃ સિદ્ધચારણૈઃ ॥ ૨॥

કુલાચલેન્દ્રદ્રોણીષુ નાનાસઙ્કલ્પસિદ્ધિષુ ।
રેમે વિદ્યાધરસ્ત્રીભિર્ગાપયન્ હરિમીશ્વરમ્ ॥ ૩॥

એકદા સ વિમાનેન વિષ્ણુદત્તેન ભાસ્વતા ।
ગિરિશં દદૃશે ગચ્છન્ પરીતં સિદ્ધચારણૈઃ ॥ ૪॥

આલિઙ્ગ્યાઙ્કીકૃતાં દેવીં બાહુના મુનિસંસદિ ।
ઉવાચ દેવ્યાઃ શ‍ૃણ્વત્યા જહાસોચ્ચૈસ્તદન્તિકે ॥ ૫॥

ચિત્રકેતુરુવાચ
એષ લોકગુરુઃ સાક્ષાદ્ધર્મં વક્તા શરીરિણામ્ ।
આસ્તે મુખ્યઃ સભાયાં વૈ મિથુનીભૂય ભાર્યયા ॥ ૬॥

જટાધરસ્તીવ્રતપા બ્રહ્મવાદિસભાપતિઃ ।
અઙ્કીકૃત્ય સ્ત્રિયં ચાસ્તે ગતહ્રીઃ પ્રાકૃતો યથા ॥ ૭॥

પ્રાયશઃ પ્રાકૃતાશ્ચાપિ સ્ત્રિયં રહસિ બિભ્રતિ ।
અયં મહાવ્રતધરો બિભર્તિ સદસિ સ્ત્રિયમ્ ॥ ૮॥

શ્રીશુક ઉવાચ
ભગવાનપિ તચ્છ્રુત્વા પ્રહસ્યાગાધધીર્નૃપ ।
તૂષ્ણીં બભૂવ સદસિ સભ્યાશ્ચ તદનુવ્રતાઃ ॥ ૯॥

ઇત્યતદ્વીર્યવિદુષિ બ્રુવાણે બહ્વશોભનમ્ ।
રુષાઽઽહ દેવી ધૃષ્ટાય નિર્જિતાત્માભિમાનિને ॥ ૧૦॥

પાર્વત્યુવાચ
અયં કિમધુના લોકે શાસ્તા દણ્ડધરઃ પ્રભુઃ ।
અસ્મદ્વિધાનાં દુષ્ટાનાં નિર્લજ્જાનાં ચ વિપ્રકૃત્ ॥ ૧૧॥

ન વેદ ધર્મં કિલ પદ્મયોનિ-
ર્ન બ્રહ્મપુત્રા ભૃગુનારદાદ્યાઃ ।
ન વૈ કુમારઃ કપિલો મનુશ્ચ
યે નો નિષેધન્ત્યતિવર્તિનં હરમ્ ॥ ૧૨॥

એષામનુધ્યેયપદાબ્જયુગ્મં
જગદ્ગુરું મઙ્ગલમઙ્ગલં સ્વયમ્ ।
યઃ ક્ષત્રબન્ધુઃ પરિભૂય સૂરીન્
પ્રશાસ્તિ ધૃષ્ટસ્તદયં હિ દણ્ડ્યઃ ॥ ૧૩॥

નાયમર્હતિ વૈકુણ્ઠપાદમૂલોપસર્પણમ્ ।
સમ્ભાવિતમતિઃ સ્તબ્ધઃ સાધુભિઃ પર્યુપાસિતમ્ ॥ ૧૪॥

અતઃ પાપીયસીં યોનિમાસુરીં યાહિ દુર્મતે ।
યથેહ ભૂયો મહતાં ન કર્તા પુત્ર કિલ્બિષમ્ ॥ ૧૫॥

શ્રીશુક ઉવાચ
એવં શપ્તશ્ચિત્રકેતુર્વિમાનાદવરુહ્ય સઃ ।
પ્રસાદયામાસ સતીં મૂર્ધ્ના નમ્રેણ ભારત ॥ ૧૬॥

ચિત્રકેતુરુવાચ
પ્રતિગૃહ્ણામિ તે શાપમાત્મનોઽઞ્જલિનામ્બિકે ।
દેવૈર્મર્ત્યાય યત્પ્રોક્તં પૂર્વદિષ્ટં હિ તસ્ય તત્ ॥ ૧૭॥

સંસારચક્ર એતસ્મિઞ્જન્તુરજ્ઞાનમોહિતઃ ।
ભ્રામ્યન્ સુખં ચ દુઃખં ચ ભુઙ્ક્તે સર્વત્ર સર્વદા ॥ ૧૮॥

નૈવાત્મા ન પરશ્ચાપિ કર્તા સ્યાત્સુખદુઃખયોઃ ।
કર્તારં મન્યતેઽત્રાજ્ઞ આત્માનં પરમેવ ચ ॥ ૧૯॥

ગુણપ્રવાહ એતસ્મિન્ કઃ શાપઃ કો ન્વનુગ્રહઃ ।
કઃ સ્વર્ગો નરકઃ કો વા કિં સુખં દુઃખમેવ વા ॥ ૨૦॥

એકઃ સૃજતિ ભૂતાનિ ભગવાનાત્મમાયયા ।
એષાં બન્ધં ચ મોક્ષં ચ સુખં દુઃખં ચ નિષ્કલઃ ॥ ૨૧॥

ન તસ્ય કશ્ચિદ્દયિતઃ પ્રતીપો
ન જ્ઞાતિબન્ધુર્ન પરો ન ચ સ્વઃ ।
સમસ્ય સર્વત્ર નિરઞ્જનસ્ય
સુખે ન રાગઃ કુત એવ રોષઃ ॥ ૨૨॥

તથાપિ તચ્છક્તિવિસર્ગ એષાં
સુખાય દુઃખાય હિતાહિતાય ।
બન્ધાય મોક્ષાય ચ મૃત્યુજન્મનોઃ
શરીરિણાં સંસૃતયેવ કલ્પતે ॥ ૨૩॥

અથ પ્રસાદયે ન ત્વાં શાપમોક્ષાય ભામિનિ ।
યન્મન્યસે અસાધૂક્તં મમ તત્ક્ષમ્યતાં સતિ ॥ ૨૪॥

શ્રીશુક ઉવાચ
ઇતિ પ્રસાદ્ય ગિરિશૌ ચિત્રકેતુરરિન્દમ ।
જગામ સ્વવિમાનેન પશ્યતોઃ સ્મયતોસ્તયોઃ ॥ ૨૫॥

તતસ્તુ ભગવાન્ રુદ્રો રુદ્રાણીમિદમબ્રવીત્ ।
દેવર્ષિદૈત્યસિદ્ધાનાં પાર્ષદાનાં ચ શ‍ૃણ્વતામ્ ॥ ૨૬॥

શ્રીરુદ્ર ઉવાચ
દૃષ્ટવત્યસિ સુશ્રોણિ હરેરદ્ભુતકર્મણઃ ।
માહાત્મ્યં ભૃત્યભૃત્યાનાં નિઃસ્પૃહાણાં મહાત્મનામ્ ॥ ૨૭॥

નારાયણપરાઃ સર્વે ન કુતશ્ચન બિભ્યતિ ।
સ્વર્ગાપવર્ગનરકેષ્વપિ તુલ્યાર્થદર્શિનઃ ॥ ૨૮॥

દેહિનાં દેહસંયોગાદ્દ્વન્દ્વાનીશ્વરલીલયા ।
સુખં દુઃખં મૃતિર્જન્મ શાપોઽનુગ્રહ એવ ચ ॥ ૨૯॥

અવિવેકકૃતઃ પુંસો હ્યર્થભેદ ઇવાત્મનિ ।
ગુણદોષવિકલ્પશ્ચ ભિદેવ સ્રજિવત્કૃતઃ ॥ ૩૦॥

વાસુદેવે ભગવતિ ભક્તિમુદ્વહતાં નૃણામ્ ।
જ્ઞાનવૈરાગ્યવીર્યાણાં નેહ કશ્ચિદ્વ્યપાશ્રયઃ ॥ ૩૧॥

નાહં વિરિઞ્ચો ન કુમારનારદૌ
ન બ્રહ્મપુત્રા મુનયઃ સુરેશાઃ ।

વિદામ યસ્યેહિતમંશકાંશકા
ન તત્સ્વરૂપં પૃથગીશમાનિનઃ ॥ ૩૨॥

ન હ્યસ્યાસ્તિ પ્રિયઃ કશ્ચિન્નાપ્રિયઃ સ્વઃ પરોઽપિ વા ।
આત્મત્વાત્સર્વભૂતાનાં સર્વભૂતપ્રિયો હરિઃ ॥ ૩૩॥

તસ્ય ચાયં મહાભાગશ્ચિત્રકેતુઃ પ્રિયોઽનુગઃ ।
સર્વત્ર સમદૃક્ શાન્તો હ્યહં ચૈવાચ્યુતપ્રિયઃ ॥ ૩૪॥

તસ્માન્ન વિસ્મયઃ કાર્યઃ પુરુષેષુ મહાત્મસુ ।
મહાપુરુષભક્તેષુ શાન્તેષુ સમદર્શિષુ ॥ ૩૫॥

શ્રીશુક ઉવાચ
ઇતિ શ્રુત્વા ભગવતઃ શિવસ્યોમાભિભાષિતમ્ ।
બભૂવ શાન્તધી રાજન્ દેવી વિગતવિસ્મયા ॥ ૩૬॥

ઇતિ ભાગવતો દેવ્યાઃ પ્રતિશપ્તુમલન્તમઃ ।
મૂર્ધ્ના સઞ્જગૃહે શાપમેતાવત્સાધુલક્ષણમ્ ॥ ૩૭॥

જજ્ઞે ત્વષ્ટુર્દક્ષિણાગ્નૌ દાનવીં યોનિમાશ્રિતઃ ।
વૃત્ર ઇત્યભિવિખ્યાતો જ્ઞાનવિજ્ઞાનસંયુતઃ ॥ ૩૮॥

એતત્તે સર્વમાખ્યાતં યન્માં ત્વં પરિપૃચ્છસિ ।
વૃત્રસ્યાસુરજાતેશ્ચ કારણં ભગવન્મતેઃ ॥ ૩૯॥

ઇતિહાસમિમં પુણ્યં ચિત્રકેતોર્મહાત્મનઃ ।
માહાત્મ્યં વિષ્ણુભક્તાનાં શ્રુત્વા બન્ધાદ્વિમુચ્યતે ॥ ૪૦॥

ય એતત્પ્રાતરુત્થાય શ્રદ્ધયા વાગ્યતઃ પઠેત્ ।
ઇતિહાસં હરિં સ્મૃત્વા સ યાતિ પરમાં ગતિમ્ ॥ ૪૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ચિત્રકેતુશાપો નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૭॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ અષ્ટાદશોઽધ્યાયઃ - ૧૮ ॥

શ્રીશુક ઉવાચ
પૃશ્નિસ્તુ પત્ની સવિતુઃ સાવિત્રીં વ્યાહૃતિં ત્રયીમ્ ।
અગ્નિહોત્રં પશું સોમં ચાતુર્માસ્યં મહામખાન્ ॥ ૧॥

સિદ્ધિર્ભગસ્ય ભાર્યાઙ્ગ મહિમાનં વિભું પ્રભુમ્ ।
આશિષં ચ વરારોહાં કન્યાં પ્રાસૂત સુવ્રતામ્ ॥ ૨॥

ધાતુઃ કુહૂઃ સિનીવાલી રાકા ચાનુમતિસ્તથા ।
સાયં દર્શમથ પ્રાતઃ પૂર્ણમાસમનુક્રમાત્ ॥ ૩॥

અગ્નીન્ પુરીષ્યાનાધત્ત ક્રિયાયાં સમનન્તરઃ ।
ચર્ષણી વરુણસ્યાસીદ્યસ્યાં જાતો ભૃગુઃ પુનઃ ॥ ૪॥

વાલ્મીકિશ્ચ મહાયોગી વલ્મીકાદભવત્કિલ ।
અગસ્ત્યશ્ચ વસિષ્ઠશ્ચ મિત્રાવરુણયોરૃષી ॥ ૫॥

રેતઃ સિષિચતુઃ કુમ્ભે ઉર્વશ્યાઃ સન્નિધૌ દ્રુતમ્ ।
રેવત્યાં મિત્ર ઉત્સર્ગમરિષ્ટં પિપ્પલં વ્યધાત્ ॥ ૬॥

પૌલોમ્યામિન્દ્ર આધત્ત ત્રીન્ પુત્રાનિતિ નઃ શ્રુતમ્ ।
જયન્તમૃષભં તાત તૃતીયં મીઢુષં પ્રભુઃ ॥ ૭॥

ઉરુક્રમસ્ય દેવસ્ય માયાવામનરૂપિણઃ ।
કીર્તૌ પત્ન્યાં બૃહચ્છ્લોકસ્તસ્યાસન્ સૌભગાદયઃ ॥ ૮॥

તત્કર્મગુણવીર્યાણિ કાશ્યપસ્ય મહાત્મનઃ ।
પશ્ચાદ્વક્ષ્યામહેઽદિત્યાં યથા વાવતતાર હ ॥ ૯॥

અથ કશ્યપદાયાદાન્ દૈતેયાન્ કીર્તયામિ તે ।
યત્ર ભાગવતઃ શ્રીમાન્ પ્રહ્લાદો બલિરેવ ચ ॥ ૧૦॥

દિતેર્દ્વાવેવ દાયાદૌ દૈત્યદાનવવન્દિતૌ ।
હિરણ્યકશિપુર્નામ હિરણ્યાક્ષશ્ચ કીર્તિતૌ ॥ ૧૧॥

હિરણ્યકશિપોર્ભાર્યા કયાધુર્નામ દાનવી ।
જમ્ભસ્ય તનયા દત્તા સુષુવે ચતુરઃ સુતાન્ ॥ ૧૨॥

સંહ્લાદં પ્રાગનુહ્લાદં હ્લાદં પ્રહ્લાદમેવ ચ ।
તત્સ્વસા સિંહિકા નામ રાહું વિપ્રચિતોઽગ્રહીત્ ॥ ૧૩॥

શિરોઽહરદ્ધસ્ય હરિશ્ચક્રેણ પિબતોઽમૃતમ્ ।
સંહ્લાદસ્ય કૃતિર્ભાર્યાસૂત પઞ્ચજનં તતઃ ॥ ૧૪॥

હ્લાદસ્ય ધમનિર્ભાર્યાસૂત વાતાપિમિલ્વલમ્ ।
યોઽગસ્ત્યાય ત્વતિથયે પેચે વાતાપિમિલ્વલઃ ॥ ૧૫॥

અનુહ્લાદસ્ય સૂર્મ્યાયાં બાષ્કલો મહિષસ્તથા ।
વિરોચનસ્તુ પ્રાહ્લાદિર્દેવ્યાસ્તસ્યાભવદ્બલિઃ ॥ ૧૬॥

બાણજ્યેષ્ઠં પુત્રશતમશનાયાં તતોઽભવત્ ।
તસ્યાનુભાવં સુશ્લોક્યાઃ પશ્ચાદેવાભિધાસ્યતે ॥ ૧૭॥

બાણ આરાધ્ય ગિરિશં લેભે તદ્ગણમુખ્યતામ્ ।
યત્પાર્શ્વે ભગવાનાસ્તે હ્યદ્યાપિ પુરપાલકઃ ॥ ૧૮॥

મરુતશ્ચ દિતેઃ પુત્રાશ્ચત્વારિંશન્નવાધિકાઃ ।
ત આસન્નપ્રજાઃ સર્વે નીતા ઇન્દ્રેણ સાત્મતામ્ ॥ ૧૯॥

રાજોવાચ
કથં ત આસુરં ભાવમપોહ્યૌત્પત્તિકં ગુરો ।
ઇન્દ્રેણ પ્રાપિતાઃ સાત્મ્યં કિં તત્સાધુ કૃતં હિ તૈઃ ॥ ૨૦॥

ઇમે શ્રદ્દધતે બ્રહ્મન્નૃષયો હિ મયા સહ ।
પરિજ્ઞાનાય ભગવંસ્તન્નો વ્યાખ્યાતુમર્હસિ ॥ ૨૧॥

સૂત ઉવાચ
તદ્વિષ્ણુરાતસ્ય સ બાદરાયણિ-
ર્વચો નિશમ્યાદૃતમલ્પમર્થવત્ ।
સભાજયન્ સન્નિભૃતેન ચેતસા
જગાદ સત્રાયણ સર્વદર્શનઃ ॥ ૨૨॥

શ્રીશુક ઉવાચ
હતપુત્રા દિતિઃ શક્રપાર્ષ્ણિગ્રાહેણ વિષ્ણુના ।
મન્યુના શોકદીપ્તેન જ્વલન્તી પર્યચિન્તયત્ ॥ ૨૩॥

કદા નુ ભ્રાતૃહન્તારમિન્દ્રિયારામમુલ્બણમ્ ।
અક્લિન્નહૃદયં પાપં ઘાતયિત્વા શયે સુખમ્ ॥ ૨૪॥

કૃમિવિડ્ભસ્મસંજ્ઞાસીદ્યસ્યેશાભિહિતસ્ય ચ ।
ભૂતધ્રુક્ તત્કૃતે સ્વાર્થં કિં વેદ નિરયો યતઃ ॥ ૨૫॥

આશાસાનસ્ય તસ્યેદં ધ્રુવમુન્નદ્ધચેતસઃ ।
મદશોષક ઇન્દ્રસ્ય ભૂયાદ્યેન સુતો હિ મે ॥ ૨૬॥

ઇતિ ભાવેન સા ભર્તુરાચચારાસકૃત્પ્રિયમ્ ।
શુશ્રૂષયાનુરાગેણ પ્રશ્રયેણ દમેન ચ ॥ ૨૭॥

ભક્ત્યા પરમયા રાજન્ મનોજ્ઞૈર્વલ્ગુભાષિતૈઃ ।
મનો જગ્રાહ ભાવજ્ઞા સુસ્મિતાપાઙ્ગવીક્ષણૈઃ ॥ ૨૮॥

એવં સ્ત્રિયા જડીભૂતો વિદ્વાનપિ વિદગ્ધયા ।
બાઢમિત્યાહ વિવશો ન તચ્ચિત્રં હિ યોષિતિ ॥ ૨૯॥

વિલોક્યૈકાન્તભૂતાનિ ભૂતાન્યાદૌ પ્રજાપતિઃ ।
સ્ત્રિયં ચક્રે સ્વદેહાર્ધં યયા પુંસાં મતિર્હૃતા ॥ ૩૦॥

એવં શુશ્રૂષિતસ્તાત ભગવાન્ કશ્યપઃ સ્ત્રિયા ।
પ્રહસ્ય પરમપ્રીતો દિતિમાહાભિનન્દ્ય ચ ॥ ૩૧॥

કશ્યપ ઉવાચ
વરં વરય વામોરુ પ્રીતસ્તેઽહમનિન્દિતે ।
સ્ત્રિયા ભર્તરિ સુપ્રીતે કઃ કામ ઇહ ચાગમઃ ॥ ૩૨॥

પતિરેવ હિ નારીણાં દૈવતં પરમં સ્મૃતમ્ ।
માનસઃ સર્વભૂતાનાં વાસુદેવઃ શ્રિયઃ પતિઃ ॥ ૩૩॥

સ એવ દેવતાલિઙ્ગૈર્નામરૂપવિકલ્પિતૈઃ ।
ઇજ્યતે ભગવાન્ પુમ્ભિઃ સ્ત્રીભિશ્ચ પતિરૂપધૃક્ ॥ ૩૪॥

તસ્માત્પતિવ્રતાનાર્યઃ શ્રેયસ્કામાઃ સુમધ્યમે ।
યજન્તેઽનન્યભાવેન પતિમાત્માનમીશ્વરમ્ ॥ ૩૫॥

સોઽહં ત્વયાર્ચિતો ભદ્રે ઈદૃગ્ભાવેન ભક્તિતઃ ।
તત્તે સમ્પાદયે કામમસતીનાં સુદુર્લભમ્ ॥ ૩૬॥

દિતિરુવાચ
વરદો યદિ મે બ્રહ્મન્ પુત્રમિન્દ્રહણં વૃણે ।
અમૃત્યું મૃતપુત્રાહં યેન મે ઘાતિતૌ સુતૌ ॥ ૩૭॥

નિશમ્ય તદ્વચો વિપ્રો વિમનાઃ પર્યતપ્યત ।
અહો અધર્મઃ સુમહાનદ્ય મે સમુપસ્થિતઃ ॥ ૩૮॥

અહો અદ્યેન્દ્રિયારામો યોષિન્મય્યેહ માયયા ।
ગૃહીતચેતાઃ કૃપણઃ પતિષ્યે નરકે ધ્રુવમ્ ॥ ૩૯॥

કોઽતિક્રમોઽનુવર્તન્ત્યાઃ સ્વભાવમિહ યોષિતઃ ।
ધિઙ્ માં બતાબુધં સ્વાર્થે યદહં ત્વજિતેન્દ્રિયઃ ॥ ૪૦॥

શરત્પદ્મોત્સવં વક્ત્રં વચશ્ચ શ્રવણામૃતમ્ ।
હૃદયં ક્ષુરધારાભં સ્ત્રીણાં કો વેદ ચેષ્ટિતમ્ ॥ ૪૧॥

ન હિ કશ્ચિત્પ્રિયઃ સ્ત્રીણામઞ્જસા સ્વાશિષાત્મનામ્ ।
પતિં પુત્રં ભ્રાતરં વા ઘ્નન્ત્યર્થે ઘાતયન્તિ ચ ॥ ૪૨॥

પ્રતિશ્રુતં દદામીતિ વચસ્તન્ન મૃષા ભવેત્ ।
વધં નાર્હતિ ચેન્દ્રોઽપિ તત્રેદમુપકલ્પતે ॥ ૪૩॥

ઇતિ સઞ્ચિન્ત્ય ભગવાન્ મારીચઃ કુરુનન્દન ।
ઉવાચ કિઞ્ચિત્કુપિત આત્માનં ચ વિગર્હયન્ ॥ ૪૪॥

કશ્યપ ઉવાચ
પુત્રસ્તે ભવિતા ભદ્રે ઇન્દ્રહા દેવબાન્ધવઃ ।
સંવત્સરં વ્રતમિદં યદ્યઞ્જો ધારયિષ્યસિ ॥ ૪૫॥

દિતિરુવાચ
ધારયિષ્યે વ્રતં બ્રહ્મન્ બ્રૂહિ કાર્યાણિ યાનિ મે ।
યાનિ ચેહ નિષિદ્ધાનિ ન વ્રતં ઘ્નન્તિ યાનિ તુ ॥ ૪૬॥

કશ્યપ ઉવાચ
ન હિંસ્યાદ્ભૂતજાતાનિ ન શપેન્નાનૃતં વદેત્ ।
ન છિન્દ્યાન્નખરોમાણિ ન સ્પૃશેદ્યદમઙ્ગલમ્ ॥ ૪૭॥

નાપ્સુ સ્નાયાન્ન કુપ્યેત ન સમ્ભાષેત દુર્જનૈઃ ।
ન વસીતાધૌતવાસઃ સ્રજં ચ વિધૃતાં ક્વચિત્ ॥ ૪૮॥

નોચ્છિષ્ટં ચણ્ડિકાન્નં ચ સામિષં વૃષલાહૃતમ્ ।
ભુઞ્જીતોદક્યયા દૃષ્ટં પિબેદઞ્જલિના ત્વપઃ ॥ ૪૯॥

નોચ્છિષ્ટાસ્પૃષ્ટસલિલા સન્ધ્યાયાં મુક્તમૂર્ધજા ।

અનર્ચિતાસંયતવાક્ નાસંવીતા બહિશ્ચરેત્ ॥ ૫૦॥

નાધૌતપાદાપ્રયતા નાર્દ્રપાદા ઉદક્શિરાઃ ।
શયીત નાપરાઙ્નાન્યૈર્ન નગ્ના ન ચ સન્ધ્યયોઃ ॥ ૫૧॥

ધૌતવાસા શુચિર્નિત્યં સર્વમઙ્ગલસંયુતા ।
પૂજયેત્પ્રાતરાશાત્પ્રાગ્ગોવિપ્રાઞ્શ્રિયમચ્યુતમ્ ॥ ૫૨॥

સ્ત્રિયો વીરવતીશ્ચાર્ચેત્સ્રગ્ગન્ધબલિમણ્ડનૈઃ ।
પતિં ચાર્ચ્યોપતિષ્ઠેત ધ્યાયેત્કોષ્ઠગતં ચ તમ્ ॥ ૫૩॥

સાંવત્સરં પુંસવનં વ્રતમેતદવિપ્લુતમ્ ।
ધારયિષ્યસિ ચેત્તુભ્યં શક્રહા ભવિતા સુતઃ ॥ ૫૪॥

બાઢમિત્યભિપ્રેત્યાથ દિતી રાજન્ મહામનાઃ ।
કશ્યપાદ્ગર્ભમાધત્ત વ્રતં ચાઞ્જો દધાર સા ॥ ૫૫॥

માતૃષ્વસુરભિપ્રાયમિન્દ્ર આજ્ઞાય માનદ ।
શુશ્રૂષણેનાશ્રમસ્થાં દિતિં પર્યચરત્કવિઃ ॥ ૫૬॥

નિત્યં વનાત્સુમનસઃ ફલમૂલસમિત્કુશાન્ ।
પત્રાઙ્કુરમૃદોઽપશ્ચ કાલે કાલ ઉપાહરત્ ॥ ૫૭॥

એવં તસ્યા વ્રતસ્થાયા વ્રતચ્છિદ્રં હરિર્નૃપ ।
પ્રેપ્સુઃ પર્યચરજ્જિહ્મો મૃગહેવ મૃગાકૃતિઃ ॥ ૫૮॥

નાધ્યગચ્છદ્વ્રતચ્છિદ્રં તત્પરોઽથ મહીપતે ।
ચિન્તાં તીવ્રાં ગતઃ શક્રઃ કેન મે સ્યાચ્છિવં ત્વિહ ॥ ૫૯॥

એકદા સા તુ સન્ધ્યાયામુચ્છિષ્ટા વ્રતકર્શિતા ।
અસ્પૃષ્ટવાર્યધૌતાઙ્ઘ્રિઃ સુષ્વાપ વિધિમોહિતા ॥ ૬૦॥

લબ્ધ્વા તદન્તરં શક્રો નિદ્રાપહૃતચેતસઃ ।
દિતેઃ પ્રવિષ્ટ ઉદરં યોગેશો યોગમાયયા ॥ ૬૧॥

ચકર્ત સપ્તધા ગર્ભં વજ્રેણ કનકપ્રભમ્ ।
રુદન્તં સપ્તધૈકૈકં મા રોદીરિતિ તાન્ પુનઃ ॥ ૬૨॥

તે તમૂચુઃ પાટ્યમાનાસ્તે સર્વે પ્રાઞ્જલયો નૃપ ।
નો જિઘાંસસિ કિમિન્દ્ર ભ્રાતરો મરુતસ્તવ ॥ ૬૩॥

મા ભૈષ્ટ ભ્રાતરો મહ્યં યૂયમિત્યાહ કૌશિકઃ ।
અનન્યભાવાન્ પાર્ષદાનાત્મનો મરુતાં ગણાન્ ॥ ૬૪॥

ન મમાર દિતેર્ગર્ભઃ શ્રીનિવાસાનુકમ્પયા ।
બહુધા કુલિશક્ષુણ્ણો દ્રૌણ્યસ્ત્રેણ યથા ભવાન્ ॥ ૬૫॥

સકૃદિષ્ટ્વાઽઽદિપુરુષં પુરુષો યાતિ સામ્યતામ્ ।
સંવત્સરં કિઞ્ચિદૂનં દિત્યા યદ્ધરિરર્ચિતઃ ॥ ૬૬॥

સજૂરિન્દ્રેણ પઞ્ચાશદ્દેવાસ્તે મરુતોઽભવન્ ।
વ્યપોહ્ય માતૃદોષં તે હરિણા સોમપાઃ કૃતાઃ ॥ ૬૭॥

દિતિરુત્થાય દદૃશે કુમારાનનલપ્રભાન્ ।
ઇન્દ્રેણ સહિતાન્ દેવી પર્યતુષ્યદનિન્દિતા ॥ ૬૮॥

અથેન્દ્રમાહ તાતાહમાદિત્યાનાં ભયાવહમ્ ।
અપત્યમિચ્છન્ત્યચરં વ્રતમેતત્સુદુષ્કરમ્ ॥ ૬૯॥

એકઃ સઙ્કલ્પિતઃ પુત્રઃ સપ્ત સપ્તાભવન્ કથમ્ ।
યદિ તે વિદિતં પુત્ર સત્યં કથય મા મૃષા ॥ ૭૦॥

ઇન્દ્ર ઉવાચ
અમ્બ તેઽહં વ્યવસિતમુપધાર્યાગતોઽન્તિકમ્ ।
લબ્ધાન્તરોઽચ્છિદં ગર્ભમર્થબુદ્ધિર્ન ધર્મદૃક્ ॥ ૭૧॥

કૃત્તો મે સપ્તધા ગર્ભ આસન્ સપ્ત કુમારકાઃ ।
તેઽપિ ચૈકૈકશો વૃક્ણાઃ સપ્તધા નાપિ મમ્રિરે ॥ ૭૨॥

તતસ્તત્પરમાશ્ચર્યં વીક્ષ્યાધ્યવસિતં મયા ।
મહાપુરુષપૂજાયાઃ સિદ્ધિઃ કાપ્યનુષઙ્ગિણી ॥ ૭૩॥

આરાધનં ભગવત ઈહમાના નિરાશિષઃ ।
યે તુ નેચ્છન્ત્યપિ પરં તે સ્વાર્થકુશલાઃ સ્મૃતાઃ ॥ ૭૪॥

આરાધ્યાત્મપ્રદં દેવં સ્વાત્માનં જગદીશ્વરમ્ ।
કો વૃણીતે ગુણસ્પર્શં બુધઃ સ્યાન્નરકેઽપિ યત્ ॥ ૭૫॥

તદિદં મમ દૌર્જન્યં બાલિશસ્ય મહીયસિ ।
ક્ષન્તુમર્હસિ માતસ્ત્વં દિષ્ટ્યા ગર્ભો મૃતોત્થિતઃ ॥ ૭૬॥

શ્રીશુક ઉવાચ

ઇન્દ્રસ્તયાભ્યનુજ્ઞાતઃ શુદ્ધભાવેન તુષ્ટયા ।
મરુદ્ભિઃ સહ તાં નત્વા જગામ ત્રિદિવં પ્રભુઃ ॥ ૭૭॥

એવં તે સર્વમાખ્યાતં યન્માં ત્વં પરિપૃચ્છસિ ।
મઙ્ગલં મરુતાં જન્મ કિં ભૂયઃ કથયામિ તે ॥ ૭૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે મરુદુત્પત્તિકથનં નામ અષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકોનવિંશોઽધ્યાયઃ - ૧૯ ॥

રાજોવાચ
વ્રતં પુંસવનં બ્રહ્મન્ ભવતા યદુદીરિતમ્ ।
તસ્ય વેદિતુમિચ્છામિ યેન વિષ્ણુઃ પ્રસીદતિ ॥ ૧॥

શ્રીશુક ઉવાચ
શુક્લે માર્ગશિરે પક્ષે યોષિદ્ભર્તુરનુજ્ઞયા ।
આરભેત વ્રતમિદં સાર્વકામિકમાદિતઃ ॥ ૨॥

નિશમ્ય મરુતાં જન્મ બ્રાહ્મણાનનુમન્ત્ર્ય ચ ।
સ્નાત્વા શુક્લદતી શુક્લે વસીતાલઙ્કૃતામ્બરે ।
પૂજયેત્પ્રાતરાશાત્પ્રાગ્ભગવન્તં શ્રિયા સહ ॥ ૩॥

અલં તે નિરપેક્ષાય પૂર્ણકામ નમોઽસ્તુ તે ।
મહાવિભૂતિપતયે નમઃ સકલસિદ્ધયે ॥ ૪॥

યથા ત્વં કૃપયા ભૂત્યા તેજસા મહિમૌજસા ।
જુષ્ટ ઈશ ગુણૈઃ સર્વૈસ્તતોઽસિ ભગવાન્ પ્રભુઃ ॥ ૫॥

વિષ્ણુપત્નિ મહામાયે મહાપુરુષલક્ષણે ।
પ્રીયેથા મે મહાભાગે લોકમાતર્નમોઽસ્તુ તે ॥ ૬॥

ઓં નમો ભગવતે મહાપુરુષાય મહાનુભાવાય
મહાવિભૂતિપતયે સહ મહાવિભૂતિભિર્બલિમુપ-

હરાણીતિ અનેનાહરહર્મન્ત્રેણ વિષ્ણોરાવાહના-
ર્ઘ્યપાદ્યોપસ્પર્શનસ્નાનવાસૌપવીતવિભૂષણ-
ગન્ધપુષ્પધૂપદીપોપહારાદ્યુપચારાંશ્ચ
સમાહિતોપાહરેત્ ॥ ૭॥

હવિઃશેષં તુ જુહુયાદનલે દ્વાદશાહુતીઃ ।
ઓં નમો ભગવતે મહાપુરુષાય મહાવિભૂતિપતયે
સ્વાહેતિ ॥ ૮॥

શ્રિયં વિષ્ણું ચ વરદાવાશિષાં પ્રભવાવુભૌ ।
ભક્ત્યા સમ્પૂજયેન્નિત્યં યદીચ્છેત્સર્વસમ્પદઃ ॥ ૯॥

પ્રણમેદ્દણ્ડવદ્ભૂમૌ ભક્તિપ્રહ્વેણ ચેતસા ।
દશવારં જપેન્મન્ત્રં તતઃ સ્તોત્રમુદીરયેત્ ॥ ૧૦॥

યુવાં તુ વિશ્વસ્ય વિભૂ જગતઃ કારણં પરમ્ ।
ઇયં હિ પ્રકૃતિઃ સૂક્ષ્મા માયાશક્તિર્દુરત્યયા ॥ ૧૧॥

તસ્યા અધીશ્વરઃ સાક્ષાત્ત્વમેવ પુરુષઃ પરઃ ।
ત્વં સર્વયજ્ઞ ઇજ્યેયં ક્રિયેયં ફલભુગ્ભવાન્ ॥ ૧૨॥

ગુણવ્યક્તિરિયં દેવી વ્યઞ્જકો ગુણભુગ્ભવાન્ ।
ત્વં હિ સર્વશરીર્યાત્મા શ્રીઃ શરીરેન્દ્રિયાશયા ।
નામરૂપે ભગવતી પ્રત્યયસ્ત્વમપાશ્રયઃ ॥ ૧૩॥

યથા યુવાં ત્રિલોકસ્ય વરદૌ પરમેષ્ઠિનૌ ।
તથા મ ઉત્તમશ્લોક સન્તુ સત્યા મહાશિષઃ ॥ ૧૪॥

ઇત્યભિષ્ટૂય વરદં શ્રીનિવાસં શ્રિયા સહ ।
તન્નિઃસાર્યોપહરણં દત્ત્વાઽઽચમનમર્ચયેત્ ॥ ૧૫॥

તતઃ સ્તુવીત સ્તોત્રેણ ભક્તિપ્રહ્વેણ ચેતસા ।
યજ્ઞોચ્છિષ્ટમવઘ્રાય પુનરભ્યર્ચયેદ્ધરિમ્ ॥ ૧૬॥

પતિં ચ પરયા ભક્ત્યા મહાપુરુષચેતસા ।
પ્રિયૈસ્તૈસ્તૈરુપનમેત્પ્રેમશીલઃ સ્વયં પતિઃ ।
બિભૃયાત્સર્વકર્માણિ પત્ન્યા ઉચ્ચાવચાનિ ચ ॥ ૧૭॥

કૃતમેકતરેણાપિ દમ્પત્યોરુભયોરપિ ।

પત્ન્યાં કુર્યાદનર્હાયાં પતિરેતત્સમાહિતઃ ॥ ૧૮॥

વિષ્ણોર્વ્રતમિદં બિભ્રન્ન વિહન્યાત્કથઞ્ચન ।
વિપ્રાન્ સ્ત્રિયો વીરવતીઃ સ્રગ્ગન્ધબલિમણ્ડનૈઃ ।
અર્ચેદહરહર્ભક્ત્યા દેવં નિયમમાસ્થિતા ॥ ૧૯॥

ઉદ્વાસ્ય દેવં સ્વે ધામ્નિ તન્નિવેદિતમગ્રતઃ ।
અદ્યાદાત્મવિશુદ્ધ્યર્થં સર્વકામર્દ્ધયે તથા ॥ ૨૦॥

એતેન પૂજાવિધિના માસાન્ દ્વાદશ હાયનમ્ ।
નીત્વાથોપરમેત્સાધ્વી કાર્તિકે ચરમેઽહનિ ॥ ૨૧॥

શ્વોભૂતેઽપ ઉપસ્પૃશ્ય કૃષ્ણમભ્યર્ચ્ય પૂર્વવત્ ।
પયઃશૃતેન જુહુયાચ્ચરુણા સહ સર્પિષા ।
પાકયજ્ઞવિધાનેન દ્વાદશૈવાહુતીઃ પતિઃ ॥ ૨૨॥

આશિષઃ શિરસાઽઽદાય દ્વિજૈઃ પ્રીતૈઃ સમીરિતાઃ ।
પ્રણમ્ય શિરસા ભક્ત્યા ભુઞ્જીત તદનુજ્ઞયા ॥ ૨૩॥

આચાર્યમગ્રતઃ કૃત્વા વાગ્યતઃ સહ બન્ધુભિઃ ।
દદ્યાત્પત્ન્યૈ ચરોઃ શેષં સુપ્રજસ્ત્વં સુસૌભગમ્ ॥ ૨૪॥

એતચ્ચરિત્વા વિધિવદ્વ્રતં વિભો-
રભીપ્સિતાર્થં લભતે પુમાનિહ ।
સ્ત્રી ત્વેતદાસ્થાય લભેત સૌભગં
શ્રિયં પ્રજાં જીવપતિં યશો ગૃહમ્ ॥ ૨૫॥

કન્યા ચ વિન્દેત સમગ્રલક્ષણં
વરં ત્વવીરા હતકિલ્બિષા ગતિમ્ ।
મૃતપ્રજા જીવસુતા ધનેશ્વરી
સુદુર્ભગા સુભગા રૂપમગ્ર્યમ્ ॥ ૨૬॥

વિન્દેદ્વિરૂપા વિરુજા વિમુચ્યતે
ય આમયાવીન્દ્રિયકલ્પદેહમ્ ।
એતત્પઠન્નભ્યુદયે ચ કર્મ-
ણ્યનન્તતૃપ્તિઃ પિતૃદેવતાનામ્ ॥ ૨૭॥

તુષ્ટાઃ પ્રયચ્છન્તિ સમસ્તકામાન્
હોમાવસાને હુતભુક્ શ્રીર્હરિશ્ચ ।

રાજન્ મહન્મરુતાં જન્મ પુણ્યં
દિતેર્વ્રતં ચાભિહિતં મહત્તે ॥ ૨૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે વૈયાસક્યામષ્ટાદશસાહસ્ર્યાં
પારમહંસ્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે પુંસવનવ્રતકથનં
નામૈકોનવિંશોઽધ્યાયઃ ॥ ૧૯॥

॥ ઇતિ ષષ્ઠસ્કન્ધઃ સમાપ્તઃ ॥

॥ ૐ તત્સત્ ॥

shrImadbhAgavataM - ShaShThaskandhaH

pdf was typeset on May 15, 2025

Please send corrections to *sanskrit@cheerful.com*